५५३१-५२

नं० ५५३१ — घ
(शिवकवचम्)
शिवजीवदशकम् (संपूर्णम्)
पत्राणि ५२ (तन्त्रशास्त्रम्)

१८८ शिवजीवदशकादि १८८

नं० ५५ ३१-घ


~~श्रीगुरुस्तुतिरत्नावली~~

शिवजीवदशक (तन्त्रम्)

~~नं० १०~~ पत्राणि ५२

नं० १०६३

123



नं. २०६९-क
शिवजीवदशकम्
— से शिवकवच कर्मला १२कोष्ठिकां
५२ पत्राणि
तन्त्रम्

नं० ५५३१ - घ शिवकवचम्
शिवजीवदशकम् (सम्पूर्णम्)
पत्राणि ५२ (तन्त्रशास्त्रम्)

ॐ श्रीस्वात्मने गुरवे शिवायों नमः श्रीगणपतये नमः विश्वोत्तीर्णं विश्वमयं नाथमनं
तं सच्चित्सातात्मानमखण्डं निखिलाद्यं वेद्यं वेद्यैः कोविदवर्यैः स्वरवेद्यं कौलाधीशं साहिबमी
डे गुरुमीशं १ नित्यं सत्यं निर्गुणमेकं गुणपूर्णं वृत्यं स्तुत्यं कृत्यविधिज्ञैः कृतकृत्यं चिद्वि
श्रान्तं श्रान्तविकल्पं भगवन्तं कौलाधीशं साहिबमीडे गुरुमीशं २ येन ध्वान्तं ध्वंसितमन्तःस्थ
मशेषं तीर्णो नो सच्छासनसत्कैरनुगीतः ज्ञात्वा सर्वैः स्वात्मगतं ज्योतिरयं तं कौलाधी
शं साहिबमीडे गुरुमीशं ३ देवैर्दृश्यो दिव्यवपुर्यो हिमशैले हेमप्रख्यः सोमकलाभूषित
शीर्षः दिव्योद्देशो हैमवतीश्लिष्टतनुस्तं कौलाधीशं साहिबमीडे गुरुमीशं ४ सिद्धैः
साध्यैः खेचरनिविद्याधरवृन्दैः सेव्यं मुख्यं सिद्धिवदन्यं प्रतिबुद्धं सिद्धीशानं स्फीतविभूतिंप
रसिद्ध्या कौलाधीशं साहिबमीडे गुरुमीशं ५ ध्यातं धीरैर्वीरवरैर्वन्दितपादं भान्तं स्वान्ते
वात्तनिधिं भक्तियुतानां कान्तं कान्त्यादित्यसमानं करुणाब्धिं कौलाधीशं साहिबमी
डे गुरुमीशं ६ कैश्चिद्दृश्यध्यायत ईशो मुनिभिर्यः स्वात्माचार्यैर्योगिभिरात्मार्पणयो
गात् मर्त्यैर्वन्द्यः कोऽपि परस्तं जगतीनं कौलाधीशं साहिबमीडे गुरुमीशं ७ सांख्यै



श्री

१

ख्यातो निष्क्रिय एकः पुरुषो यः संख्याविद्भिः केश्चिदमेयः प्रकृतिस्त्वां सृष्टिं द्रष्टा कारयते का
रणकीर्त्या कौलाधीशं साहिबमीडे गुरुमीशं ८ योन्वायैर्ज्ञैर्भावकदेवं परिभाव्य भर्ता भोक्ता
विश्वविहर्ता खिलकर्ता संहर्तेशं सांख्यविनीतानुमितस्तं कौलाधीशं साहिबमीडे गुरुमीशं ९
विश्वात्मा यस्तेजसमूर्तिः प्रतिभाख्योज्ञानप्रौढस्तुर्यदशास्थस्तदतीतः श्रुत्यंतज्ञैर्ज्ञीयत
एष श्रुतिरूपः कौलाधीशं साहिबमीडे गुरुमीशं १० शंभुः संभक्तस्य विभावी भवभव्योप्यंभो
जाद्यो यो विश्वरीशाद्द्वयविद्भिः सर्वज्ञः सद्दृशिकमुख्योद्वयद्रष्टः कौलाधीशं साहिबमीडे गु
रुमीशं ११ यन्मूर्तिः केपुष्करकोशे करपद्मे सुज्ञाख्याख्याभीतिवरांकामस्तपद्मे अत्तादत्तेथा
त्तजनेभ्यः प्रणिधाना कौलाधीशं साहिबमीडे गुरुमीशं १२ दीक्षात्मा यो दीक्षकरूपोप्यवि
दीक्षो मंत्राक्रम्यो मांत्रिकमूर्तिः परमेत्रः सर्वाचार्यः सर्वगआर्यैः स्मृतआर्यैः कौलाधीशं सा
हिबमीडे गुरुमीशं १३ शाक्त्यानंते शांभवविद्याबुधिमग्नाब्राह्म्यारूढः स्तौति विरिंचिः
समहेंद्रः विष्णवरण्यैर्विश्वपतिं यं प्रविशुक्तं कौलाधीशं साहिबमीडे गुरुमीशं १४
भर्गब्रह्मज्ञायकविस्तोपरमात्मन्दातर्मीतर्देविगुरो नातसर्वीत्वं पाहीत्थं योगीयतए

कः परमभक्तैः कौलाधीशं साहिबमीडे गुरुमीशं १५ सर्वान्तं संसज्जनशिष्याश्रितमर्च्यं प्र
णीनं देचिद्धनसिद्धं परभानात् विश्रामारामे विनिषण्णं शिपीठे कौलाधीशं साहि
बमीडे गुरुमीशं १६ कृत्स्नस्यांतर्भातिसमिद्धे निजसिद्धे स्वस्मिन् यस्मिन् मंगलदीपे
रमतेयः बाह्यं वोद्वाभास्यगवातेरपिभास्यं कौलाधीशं साहिबमीडे गुरुमीशं १७ एत
त्सद्गुरुवेदनं प्रविदध्यौ कौलेश्वरः कौलिकः पद्यैर्मन्त्रमयैरष्टतरचितैर्ज्योतिष्प्रकाशाभिधः
श्रीमत्साहिबपादभक्तिरसधयामत्तो मयूरो यथा १८ इतिश्रीमच्छ्रीगुरुस्तुतिः ॥
ॐ श्रीदेव्यै नमः साक्षात्कृत्य निजं स्वरूपममलं यज्ज्ञात्वा विश्वमयं हित्वा भ्रांतिमतिं
महेश इति यो देवर्षिमर्त्यैः स्तुतः बद्धान् भक्तजनान् विमोचयति सत्कारणाद्दक्षात्क्षणात्
कौलेशं कुलशेखरं गुरुवरं ध्यायामि तं साहिबं १ यस्यैकस्य विभोर्विभाविकसनात् प्रोद्दे
ति विश्वस्थितिं व्याप्नोत्यंश्वनिमेषणात्तत्क्षणमपि प्रत्यस्तमायात्यहो स्वच्छंदं सततोदितं
सकलगं पूर्णं विश्वहंसं सदा नौम्यानंदनिधिं चिदेव रमणं श्रीसाहिबं तं शिवं २ आदा
वाधारपद्मात्प्रतिभुवनमलं भासयन् स्वप्रभाभिः श्रित्वा मेदारविंदाकरमसृतवपुः पाद

श्री
२
कंजस्तुतैर्यः सिंचन्पीयूषवर्षैः स्वरसुनिपिटकान्कार्मिकांस्तीर्थसंघान् ब्रह्मांडागारशं
भुः स्फुरतिपरमहंस्तङ्गजे साहिबाख्ये ३ यान्नायस्यपदाब्जवेदनरसात्स्वर्गं तनोतीप्सिते वि
स्तृजिस्तृमखाचरत्तिपदांभोजार्चनात्संस्तुतिं रुद्रस्त्वेशसदाशिवौ त्रिजगतो भ्रूभंगिशिष्टा
पिधा कारुण्येन च तो विभुं परशिवं तं साहिबं त्वार्चये ४ त्वंस्वातंत्र्यरुचिस्त्वभक्तजनताधीना
त्मकस्त्वंप्रभो त्वंविश्वाश्रयतत्त्वभूतिजनिता त्वं तत्त्वतो नाश्रितः त्वं कृत्स्नज्ञविधातृतायव
यवी त्वं केतुकांतपिंतस्त्वं कारुण्यनिधिस्त्वपारमहिमा श्रीसाहिबं तं स्तुवे ५ कायःकाय
तिकल्पितः किलशिलाकल्पा हृषीकव्रजा दृष्टं तिप्रभवो भवस्थितिलयान् भावेषु कर्तृ
स्फुटं प्राणः प्राणतियन्मरीचिकलया तं जीवजीवं शिवं चिन्नाथं सहजे निजं गुरुतनं ध्यामाश्र
ये साहिबं ६ मायात्मसमस्तजेतततिश्र्जागत्संजसंचयः षड्भावाविकृतिं विवर्तयति
यो सौ निर्विकारः स्वयं एकोनेकतया स्वशक्तिलहरीहृद्भैर्निजं खेलयन्नेकाकार इवावबुधैरनु
मितस्तं भावये साहिबं ७ कर्तातर्कनये विशुक्रपुरुषः सांख्येजिनः सौगते शाब्दात्माध्वनि
ष्णासनेविधियुतं कर्मायने जैमिनेः ब्रह्मैकं श्रुतिमस्तके हरिरयं योगीयते वैष्णवे शैवे शंभुर

शेषरूपमतलं तं साहृदिवं संश्रये ८ नित्याह्लादमयं निरामयमसंनिर्धूततीर्थ्याहसं निरीहाक
लनं निरादिनिधनं निर्द्वैतबोधात्मकं निःस्पन्दस्फुरितं निरुत्तरकलाश्लिष्टं गुरुं निर्मलं नि
श्शेषाश्रयमीश्वरं निरुपमं नित्यं भजे साहृदिवं ९ संविद्ध्यानविमर्शहर्षवपुषा नाके प्रका
श्याभितो येन प्राग्विदविस्मयबोधभरितं तेजःसमुल्लासितं स्वस्वच्छं प्रतिभास्वभावसुभ
गं चार्थ्यप्रसन्नप्रियाम् शिष्यान् कारुणिकं शिवं नवतनुं प्रेडे गुरुं साहृदिवं १० यन्मूर्तिर्भुव
ने महात्मभिरलं ध्येया सहस्रच्छदे पद्मे शुभ्रसितां बरा त्रिनयना सोमा सनासोमभाः चि
न्मुद्रावरपुस्तकाभयकरा वामार्धदेहांकिता भक्तानुग्रहतत्परा परशिवं तं साहृदिवं भावये
११ श्रीतर्थायप्रजौकलोचशशिनो भालेक्षणं भूतले सोयं शंकरनाथ एव विहरन्नाचार्य
गात्रस्थितः साक्षान्नृन्दयते पराद्वयदृशा संशुक्तसूक्ष्मागिरा सच्चित्साततयं नेनमामि पर
मेशानं प्रभुं साहृदिवं १२ यः पादद्वयनिर्गलत्परसुधाधाराभिराराधकान् संतर्प्याविरतं पदा
ब्जेशरणान् दासान् स्वमेभ्यः स्वभः स्वामी स्वर्विषयातिशायि गदितं दत्ते प्रभुत्वं महज्जीव
न्मुक्तिविभूषितं परशिवं तं साहृदिवं संस्तुवे १३ तारात्माभवतारको मरयुतैर्लोकेशकेशैश्च

श्री ३

रैरेकोयोऽखिलवाङ्मयाम्बुनिधिभिश्चिद्धर्षप्रश्नैर्ध्रुवः ब्रह्माण्डादिह पुस्तोपगोचरणानमोज्योति
स्तमोज्योतिषां स्वात्मैक्यात्परिमृश्यते परशिवं तं संभजे साहिवं १४ वाग्यस्मात्प्रणतार्तिना
शानपद्मंदाकिनीवेश्वराद्स्युतकाल्रष्ठमूर्जातमाशु निमतापुस्तप्रसादास्पदा स्तोत्रैविस्तृति
भागवानतरदरैतीर्थीस्थितिसार्थीचिता विश्वेशं गुरुसत्तमं शिवकरं वंदे विभुं साहिवं १५ मायेयं
महिताप्रधानमहिलास्वान्तेअलीलोत्सवा स्वास्वाभाविकभावभावपदलहेतप्रथादायिनी
यस्येशस्य चकास्तिभावविभुताः केमोहितानोयया ईर्वोधात्मिकयात्रिविष्टपगुरुं तं साहिवं
संश्रये १६ लक्ष्मीर्यस्य जगत्प्रभोरविरतं पादाब्जसंस्पर्शतो स्वमाक्राकृत्रिमरूपतोप्यकृतका
नेदाहृष्ठसंश्रिता स्फूर्जद्बन्धविभक्तमुक्तिविभवा तं पूर्णशक्तिं प्रभुं श्रीनाथं गुरुचक्रवर्तिन
महं नौमीश्वरं साहिवं १७ आकाशोद्भुप्रकाशते सितकरः स्निग्धो यथा सेव्यते सर्वैर्दिश्वज
नार्दनःस्वरगणैश्चंडानलोजास्तथा त्रैलोक्येपिकलाप्यचंद्रस्फुचिरोवेद्योघईशो द्वयो मा
हेशैर्भजतां शरण्यमनिशं तं साहिवं त्वां स्तुवे १८ शंभुस्त्वं परशक्तिमांस्त्वसकलक्लेशैकवै
द्यानरः संवर्तस्त्वमनाद्यदेव गहने त्वं कालकालो महान् रुद्रस्त्वं वरुणानिलौ मधुरिपुः

साङ्गोप्यवेदात्मकस्त्वांश्रीसाहिबमर्चयामिसकलोत्तीर्णंमहेशंगुरुं १९ चन्द्रार्कानलमष्टश
क्तिगिरिशंव्योमस्तकंनाभिखं कुक्षिस्थांबुनिधिंहुताशवदनंस्तत्त्वामरताभासितं दिक्क
र्णंचरणक्षितिंखल्वजगत्प्राणंत्वङ्कुरात्मकं श्रीनाथंसविराजमद्भुततनुंत्वांसाहिबंभावये
२० ॐकाराद्यप्रशान्तिनिनभोतिपृथुलंनित्यंनुतंनिर्जरैः श्रीवैकुण्ठपिनाकिनायकसुखैःपीयूषह
र्षात्मकं योगान्तामिनिर्भञ्जगद्गुरुगरीयोसेव्यंहृदिस्थंशिवं प्रोत्साक्रान्तमनुत्तरंध्रुवमजं
वंदेविभुंसाहिबं २१ श्रीविश्वेश्वरभैरवोतिकरुणोहर्षेश्वरीसंयुतः साम्नायागमसम्प्रदा
यस्तुमणिश्रेणीपादिदिव्यःश्रितान् अव्यक्तोपिकृपावतारममलंव्यानंजबोधोदयं येकौ
लेशपतिंविशालयशसंजीयादसौसाहिबः २२ यःशून्याकृतिपूर्णशक्तिखचितःशून्या
लयःसन्सदा नेदाद्याभुवनेष्वपिर्तिसकलंयोनिर्गुणोनिष्कलः द्वैताद्वैतकलाश्रयोपिस
निधियोगीश्वरैर्गीयते चिद्रूपंगुरुपुष्कलंपरशिवंतंसाहिबंसंश्रये २३ ब्रह्माम्नायसरस्व
तीश्रितमुखोहंसस्थितःप्रीतिमान् द्राक्संकर्षणदेवताधिपमहासेनादियुक्तः स्वयं श्री
नाथेसततंयदर्णतिजगतीजेत्रेयमीड्यंगुरोर्मूर्तिस्थंप्रणतोस्मितेपरशिवेश्रीसाहिबेसर्वं

श्री ४

शः २४ मंत्रामांत्रिकमंत्ररूपभगवन्देवाधिदेवप्रभो श्रीश्रीकौलकुलेशदेशिकपरानं ४
दादिनाथाभयं शङ्काग्निक्षयवपुः प्रसन्नवदनोदत्तेवरंचेप्सितं नित्यंश्रीपरपादुकोचशि
वयोर्वीभूजयाम्यानतः २५ पाशैर्घोरदहनेरुडुग्गलपत्तथारश्मिभिस्त्ववेत्वांस्मरे हेतार्धांतर
विंत्रियामधरणिंश्रीसाहिबंसद्गुरुं भूर्ज्यांत्रेशिवपालनात्सदुरितध्वंसाश्चकाम्यान्दणांत्
स्मर्दंगणेत्रिगुणाधियाविजयतेश्रीपादुकांतेप्रभो २६ योदेवत्रयवर्णवीर्यविभवोप्यर्धेंदु
लेखोज्वलः संचेत्योद्वनिरोधिनादगगनांतस्थोमहाव्यापकः चित्तत्वस्वगमोद्वशक्तिरु
दितोयच्चोन्मनाचेतन स्तत्त्वज्ञैःप्रणतोसितंपरशिवंत्वांसाहिबंसंभजे २७ कालाकारदि
गाद्यकृतनवपुषोध्यानेनकिंतेविभो त्वंविश्वगजगदहितार्थजनकोप्यर्चाविधिस्तेकथं श्रा
दित्तोतस्ववर्णभास्वरतनोःकांतेस्तुतिःसाहिबं सत्येशांतमनन्तमंगरुवरेतत्वांप्रपद्येप्रभो
२८ स्नात्वादेपरिशुद्धबिंदुसरसश्चिच्चंद्रसांद्रामृतैः प्रोत्थाधारधरांस्वभावकुसुमैस्त्वयी
टवीद्योतितैः कृत्वानेदस्वधौतपूर्णहृदयानर्घोर्घपात्रेमुदा त्वांदेव्यासहदेहदेवनिल
येनाथार्चयेसाहिबं २९ मूर्त्तोभिन्नतिनाकृतीहभवनेमिन्नत्यपिरेवोसति स्वात्मस्वमोत्वति

संसृतिर्नमतिर्वैराग्यंतत्कोवेद्यति भोगोयोगतिकल्मषंस्तुकृततिलत्पादुकार्चोत्सवात्त्वांते
स्तौमिदयालुमीशचरणंश्रीसाहिबेशंकरं २० द्विश्चात्रिंशतिपद्यहृद्यमणिभिःप्रोतामहे
शात्मक श्रीमाहेश्वर्यवर्यदेशिकपतेःपतस्तोत्ररत्नावली श्रीकौलेश्वरसाहिबेतिमहित
ख्यातामियस्यैशितुर्भक्तैषाविनिवेदितोह्रिकमलेसंतुष्टयेभास्वतां २१ नाथस्यास्यपदा
ब्जेरेणुभजनात्प्राप्तप्रसादोविभुः सद्दर्शीचितचित्स्वरूपसकलज्योतिष्प्रकाशाह्वयः ना
गेंद्रास्यकृपालुमापतिसुतैःस्तुत्योह्रिपद्मोप्ययं शर्वात्माजयतिप्रदीपितमहामाहेश्वरता
स्पदः २२ श्रीशाकेश्रुतिनागतर्कशशिसंख्यातेस्यविश्वेशितुः पादांभोजमधुव्रतोमधु
सिताष्टम्यांसपर्योत्सवे श्रीगोविंदउपाहरन्नवमणिश्रेणीमिमांत्वन्वहं येदद्युःस्वगलेश्र
यंतिसुधियस्तेभोगमोक्षश्रियं २३ इतिश्रीमहामाहेश्वराचार्यश्रीमज्ज्योतिष्प्रका
शकौलानंदनाथपादपद्मानुजीविश्रीगोविंदकौलविरचिताश्रीगुरुस्तुतिरत्ना व
लीसमाप्तासंपूर्णाचेतिशिवमोम् ॥ ॥

ॐश्रीगुरवेशिवायोंनमः चंद्रापीडंत्रिनेत्रंविकसितमहसंपंचवक्त्रंकृदार्द्रं दोर्भिर्विभ्राण
मस्यङ्कुशकुलिशधनुर्दंडखट्वांगखेटान् वीणापाशेषुघंटाभयवरडमरुन्शृङ्गरंशूलयंठे
स्वच्छंस्वच्छंदनाथंनिजनिभशिवयाश्लिष्टमीडेमृडस्थं १ यत्तत्त्वातीतमाद्यंत्रिदशगुनि
नतंभातियत्तत्स्वरूपं दृष्ट्वेदंयोगिलभ्यंशशिधरमुकुटंनिष्कलंनिष्कलंकं श्यामंरक्तंत्रि
नेत्रंस्फटिकनटसितंहाटकाभंपराभं नौमीशानंस्वयंतत्परशिवइतिचिद्रूपमूर्ध्वस्थवक्त्रं २
यत्तत्स्वर्णवर्णंनलिनदलदृशंभातिवेधूककांतं भास्वत्सोमावतंसंभुजगहृतजटाजूटमैश्वर्य
दीप्तं ब्रह्मोपेंद्रादिदेवैःप्रणमितचरणंसोमितत्पूरुषाख्यं पूर्वंशंभोर्मुखंतत्स्मरनरभय
दत्कालकालंकरालं ३ घोरंघोरांधकारांजननिकरनिभंखंडितेंद्रारिमुंडंभा
लोद्यच्चंडानलार्चिर्विकृतवदनरुग्भिन्नकृत्स्नांधकारं पिंगाक्षंभोगिभोगस्फुटविकटजटं
रुद्रमुग्राट्टहासं तद्देवदक्षिणास्यंस्मरकलिमथनंमन्मथारेरघोरं ४ उद्यत्सूर्यप्रकाशंसर
सिजनयनंचारुबिंबाधरोष्ठं भक्तस्वांतेतिसौम्यंसकलसुभगतासिंधुमिंद्रार्धभूषं वामंवामे
तणांगाश्रितममरगणैरुत्तरंवंद्यमाप्यं योगींद्रैर्वामदेवंविहसितवदनंशूलिनोनित्यमीडे ५

गंगात्वंगत्तरंगाप्रावलितगगनंशेखरेनागंगंगौरं चूडागौरांशुखंडस्फुरितशितिगलंद्योतिता
नंगाभंगं प्रालेयाभंप्रसन्नंत्रिभुवनविनतंभस्मनाभासितांगं सद्योजातंभजेतन्मुखकमलमले
पश्चिमंशंकरस्य ६ विभ्राजज्योतिराढ्यंस्वकिरणपटलैर्दीपितव्याललोकं नागेंद्रैश्चोपवी
तंत्रुथदन्नुजगणैःपूजितंपुष्पपुंजैः विष्वक्संस्थंस्वयंभूश्रितजनवरदंसर्वसंहारकंतन्नन्देका
लाग्निरुद्रेश्वरहरमथरंधूर्जटेर्वक्त्रमीड्यं ७ व्योतःस्वच्छंदपूर्याम्हरशिखरिपदेमंदरेयोहिमाद्रौ
कैलासेयश्चकास्तिक्षितिजलदहनाद्यष्टमूर्तिर्महेशः स्थास्नाविंगेचराजन्निखिलभुवनगोयो
विभुःशक्तियुक्तः तस्मैसर्वेश्वरायस्वरूदयगगनस्थाययथाप्नेनमोमे ८ एतज्ज्योतिष्प्रकाशाद्ह
यगुरुचरणांभोजलब्धप्रसादः कौलेशोदारवंशोद्भवसहजजडपिप्राप्तसर्वैकसिद्धिः श्रीगोविं
दोमहेशस्तवमनवरतंसेव्यधाहार्दभक्त्या योधीतेभक्तियुक्तःसभजतिसहतीसर्वथैश्वर्यमि
ष्टं इतिश्रीमहामाहेश्वराचार्यश्रीमच्छ्रीसाहिबकौलानंदनाथपादपद्मानुजीविश्रीगोविं
दकौलविरचितेश्रीस्वच्छंदमहेश्वराष्टकंसमाप्तमितिभद्रमोम् ॥

श्री
६

ॐ नमो परमगुरवे व्याप्तचराचरभावविशेषं चिन्मयमेकमनंतमनादिं भैरवनाथमनाथश
रण्यं त्वन्मयचित्ततया हृदि वन्दे १ त्वन्मयमेकमशेषमिदानीं भाति मम त्वदनुग्रहशक्त्या
त्वं च महेश सदैव ममात्मा स्वात्ममयं मम तेन समस्तं २ स्वात्मनि विश्वगते त्वयि नाथे तेन न सं
सृतिभीतिकथास्ति सत्स्वपि दुर्धरदुःखविमोहत्रासविधायिषु कर्मगणेषु ३ अंतक मां प्रति
मा दृशमेनां क्रोधकरालतमां विदधीहि शंकरसेवनचिंतनधीरो भीषणभैरवशक्तिमयोऽ
स्मि ४ इत्थमुपोढभवन्मयसंविद् दीधितिदारितभूरितमिस्रः मृत्युयमांतककर्मपिशा
चैर्नाथ नमोस्तु न जातु बिभेमि ५ प्रोदितसत्यप्रबोधमरीचिः प्रेक्षितविश्वपदार्थसतत्त्वः
भावपरामृतनिर्भरपूर्णे त्वय्यहमात्मनि निर्वृतिमेमि ६ मानसगोचरमेति यदैव क्लेश
दशातनुतापविधात्री नाथ तदैव मम त्वदभेदस्तोत्रपरामृतवृष्टिरुदेति ७ शंकर सत्यमि
दं व्रतदानस्नानतपो भवतापविनाशि तावकशास्त्रपरामृतचिंता स्यंदति चेतसि निर्वृतिधारा ८
नृत्यति गायति हृष्यति गाढं संविदियं मम भैरवनाथ त्वां प्रियमाप्य सुदर्शनमेकं दुर्लभम
न्यजनैः समयज्ञं ९ वसुरसपौषे कृष्णदशम्यामभिनवगुप्तस्तवमिममकरोत् येन विभुर्भव

मरुसंतापं शमयति रुगिति जनस्य दयालुः ९ इतिश्रीअभिनवगुप्ताचार्यकृतं भैरवस्तोत्रं
समाप्तं ॥

ॐ श्रीदेव्यै सदा स्वफलसिद्धिदायिन्यै नमः येनोत्कीर्णं विश्वचित्रं स्वभित्तौ नानावर्णैस्त्रित्रितं
येन भक्त्या अर्पिते स्वस्मिन्नुत्पते येन हत्वा सोहं साहिबकौलकाराम शंभुः १ कः स्विद्देहः कस्य
देहः क्व देहो देही देहे नैव बद्धो न बद्धः सोहं शंभुर्विस्तरं कौगणेशो धाता शक्तिः सर्वशक्तिर्नमो
मे २ नाहं जाने नैव कुर्वे न वेद्मि मा विभावं चेत्य चेत्यो न यामि जाने कुर्वे स्वेच्छया स्वे यदि स्वे भा
वे भावे भावभावो नमो मे ३ जाग्रत्स्वेवा स्वप्नजायां दशायां सोषुप्त्यां वा या चिदाभाति तुर्या ता
मप्यतीतो तिष्ठते स्मादतीत्य सर्वं सोमे सर्वभासे नमोस्तु ४ मृत्युर्मृत्योर्मृत्युभाजां न मृत्योर्मृत्युर्ज्ञा
नौ नैव जातो यतस्ते सोहं मृत्योश्चाप्यमृत्योर्व्यतीतो भासे भासा मृत्युमृत्युर्नमो मे ५ यस्मिन्नेनां सृ
ष्टमेतद्विभाति यन्नैतस्या भानमेवेह भानं नातो येः संचेतितो जन्मभावस्तेषां मृत्युः कः क्व दृ
ष्टः श्रुतः क्व ६ चेत्सोयोगो देहजो जन्मभावस्तद्विच्छेदो मृत्युरित्येववादं तत्सेयुक्तो वा वियु

न्तेस्त्वंवंधोकस्तज्ज्ञानांहर्षशोकावतारः ७ कोहंकोहंयावदित्थंस्मरामिसोहंसोहंतावदासंशु

श्री ७ द्धोस्मि स्यांचास्मत्वात्वामिमंमांचतेयंस्वात्मास्वात्मन्यस्मिन्शेषोहमेकः ८ मत्तोभानेत्वन्मयं

मन्मयंचमत्तश्चेतत्सामग्र्यमेवात्रभाति भानेभानेचाप्यभानेचभानंसोहंभामिप्रास्तभेदैकभावः

९ भानेचेत्स्यान्निर्विमर्शेनतत्तच्चेतद्रूपंनहिभेदोनयोऽत्र भारूपायाहंविमर्शात्मकायजीवा

यास्मैमेनमोवाशिवाय १० देहेयातेमत्तकल्पामवस्थांपंचश्लोकीकेनचित्संस्मृतेयं पंच

श्लोकीप्राप्यसंज्ञाकृतान्यासाहिबकौलारामस्तस्थेनभूयः ११ पंक्तिश्लोकीदेशिकेंद्राद्धि

बुध्वाभूयोभूयःस्वात्मनासंविमृश्य जीवन्प्राप्यस्वानुभूतिंविमुक्तोलीयेतास्मिन्धाम्निनित्ये

शिवेस्वे १२ इतिश्रीमहामाहेश्वराचार्यवर्यसाहिबकौलानंदनाथविरचितंशिवजीवदश

कंसंपूर्णं ॥

ॐश्रीदेव्यैसदाश्रुफलदायिन्यैनमः श्रीभैरवउवाच अथवक्ष्यामिदेवेशि कवचंमंत्रगर्भकं

मूलमंत्रस्वरूपंचविश्वमंगलकाभिधं सर्वसंपत्प्रदंचैववामदेवस्यपार्वति गुह्यातिगुह्यंपर

मंमूलविद्यामयंध्रुवं परमार्थप्रदंनित्यंभोगमोक्षैककारणं महाभयहरंदेविमहैश्वर्यप्रदंशि
वे कवचस्यास्यदेवेशिऋषिर्भैरवईरितः अनुष्टुप्छंदश्चोक्तंवामदेवश्चदेवता ईंह्रोबी
जंपराशक्तिःतारंकीलकमीरितं धर्मार्थकाममोक्षार्थेविनियोगइतीरितः अस्यश्रीवा
मदेवकवचस्य भैरवऋषिः अनुष्टुप्छंदः श्रीवामदेवोदेवता ईंह्रोबीजं पराशक्तिः तारंकी
लकं धर्मार्थकाममोक्षार्थे कवचपाठेविनियोगः भैरवऋषयेनमः शिरसि अनुष्टुप्छन्द
सेनमः मुखे श्रीवामदेवदेवतायेनमोहृदि ईंह्रोबीजायनमोगुह्ये पराशक्तयेनमःपाद
योः तारंकीलकायनमः नाभौ कवचपाठेविनियोगः सर्वांगे अथध्यानं वराक्षमा
लाभयपद्मकहस्तः सरोजकिंजल्कसमानवर्णः त्रिलोचनश्चारुचतुर्मुखोमांपायादुदी
च्यांदिशिवामदेवः ॐवांशिरःपातुमेदेवोललाटंह्रींसदामम वामदेवःप्रदेशेमेबीजहृ
यस्वरूपिणं हुंपातुलोचनद्वंद्वंश्रवेह्रींबीजरूपिणं ह्रींकारकोकंठदेशेह्रींपातुस्कंद
योर्मम वामदेवोसदापातुभुजौसव्येतरौमम ह्रींकारोहृदयंपातुह्रींसर्व्याङ्दरंमम
ह्रींनाभौपातुसततंदेवोह्रींकाररूपकः अव्यान्मेलिंगदेशेचह्रींरत्नेन्दुदेशके चंद्रवी

श्री ८

8

जंघेपातुपादौनमःपादतलेमम दशाक्षरःपातुनित्यंसर्वांगेममसर्वदा श्वेतवर्णश्चमांपातुवा
मदेवश्चभैरवः भगलिंगामृताप्रीतासर्वसंधिषुरक्षतु शंकरोमांसदापातुममेंद्रियसमान
कं शिवोममेंद्रियार्थेषुरक्षत्वयेदखिलेष्वपि वामदेवःपश्चिमेव्याद्दक्षिणेदेवदत्तकः भग
लिंगामृतप्रीतोभगलिंगस्वरूपकः उदीच्यामूर्ध्वगःपातुपूर्वेसंहारभैरवः दिगंबरःश्म
शानस्थःपातुदिक्षुविदिक्षुच घोररावाट्टाट्टहासोमेशिवोत्वंस्वयशोभितः पातुविघ्नेषुघो
रेषुजगद्रुधिरभक्षकः करालवदनोघोरःप्रेतकोलाहलप्रियः मुक्तकेशःस्वकेशश्च
मदिरोन्मत्तभैरवः देवदत्तोमहोग्रश्चसदाश्मशानगःपरः शिरसःपादपर्यंतंदेवदत्तो
वतात्सदा इतीदंकवचंदिव्यंसाधकानांसुदुर्लभं मंत्रसिद्धिकरंसाक्षान्महादेवस्य
भाषितं इदंकवचमज्ञात्वायोजपेद्दामदेवकः शतलक्षप्रजप्तोपितस्यदेवोनसिद्ध्य
ते सशास्त्रघातमाप्नोतिसोचिरान्मृत्युमाप्नुयात् मंत्रेणम्रियतेयोगीरक्षयेत्कवचं
परं त्रिसंध्यंपठनादस्यकवचस्यतुपार्वति सिद्धियोष्टौकरेतस्यमहेशइववापरः रू
पेणस्मरतुल्योसौकामिनीनांप्रियोभवेत् तस्मादेतत्तुकवचंनदेयंयस्यकस्यचित् भ

क्तियुक्तायशान्तायदानशीलायधीमते योददातिस्वशिष्येभ्यस्तस्यवश्यंजगद्भवेत् गुह्या
द्गुह्यतरंगुह्यंमहारुद्रेणभाषितं यस्यकेदगतंतस्यकरस्थाःसर्वसिद्धयः श्रीविश्वमंगलं
नामकवचंनप्रकाशयेत् रहस्यातिरहस्यंचगोपनीयंस्वयोनिवत् इतिश्रीरुद्रयामले
तंत्रेश्रीविश्वमंगलंनामवामदेवकवचंसंपूर्णं ॥

ॐश्रीदेव्यैसदासफलदायिन्यैनमः श्रीभैरवउवाच शृणुदेविप्रवक्ष्यामिपटलंदेवदुर्लभं ८१
सर्वसिद्धिकरंदिव्यंसर्वैश्वर्यप्रदायकं यादेवदेवीवरदाशारिकात्रिपुरेश्वरी त्रैलोक्यजननी
दुर्गाविद्यासमाख्यातापरा सप्तविद्येश्वरीसैवसप्तलोकान्तराश्रया सप्तद्वीपमयीपृथ्वीस्वरू
पाकुलेश्वरी वक्ष्यामिपटलंदेविमंत्रोद्धारप्रकाशवत् यंत्रोद्धारंलयांगाढ्यंयथावद्वर्णयामि
ते मंत्रोद्धारेमहद्भाग्यंसर्वसिद्धिप्रदंकलौ लोकानांहितकामार्थंतत्रादौशृणुपार्वति तारंप
रामातटस्थिंद्वयाणीः खंशमतन्मध्यगतंचनाम अंतेप्रमरीपार्वतिशारिकायास्त्रयोदशा
र्णोमनूरक्तिगोप्यः इतिमंत्रोद्धारः प्रकाशं मंत्रस्यास्यमहादेविनविज्ञानाधिद्रषणं न

श्री
८

विपर्ययभीर्लोके सिद्धसाध्यारिसंशयः पुरश्चर्याफलं नापि न कायक्लेशसंग्रहः साक्षात्सिद्धि
प्रदो मंत्रः सर्वविघ्नापहारकः ब्रह्महत्यासुरापानमहापातकजं मलं प्रक्षालयति मंत्रोऽयं ममभक्त्य
भक्तणोङ्गतं मंत्रमुत्कीलयेद्यो दोऽमृतसंजीवयेत्ततः सिद्धमंत्रं जपेन्मध्ये दद्यादंते च संपुटं ततः
सिद्धमंत्रः सिद्धो नासाध्यो भवति ध्रुवं अस्य मंत्रस्य देवेशि प्रभावाद्भैरवो ह्यहं विष्णुर्नारायणो दे
विब्रह्मा लोकपितामहः न देयः परशिष्याय भक्तिहीनाय पार्वति अन्यथा सिद्धिहानिः स्या
दुभयोः शिवशासनतः मंत्रस्यास्य ऋषिः प्रोक्तो महादेवो महेश्वरि त्रिष्टुप्छंदः समाख्यातं शा
रिका देवता स्मृता प्रार्मबीजं रमाशक्तिः सिंधुरं कीलकं स्मृतं धर्मार्थकाममोक्षार्थे विनियो
गइतीरितः तारपरारमाबीजैः षड्दीर्घोच्चाररूपकैः न्यासं कुर्यात् षडंगानि येन देवीमयो
भवेत् ध्यानमस्याः प्रवक्ष्यामि जगच्चैतन्यकारकं येन ध्यानेन देवेशि परानंदः प्रजायते
बालार्ककोटिद्युतिमिंदुचूडां वरासिचक्राभयबाहुमाद्यां सिंहाधिरूढां शिववामदेवलीनां
भजेच्चेतसि शारिकेशीं मंत्रोद्धारं प्रवक्ष्यामि साधकानां सुभावहं सर्वार्थसाधकं दिव्यं सर्वाशाप
रिपूरकं खत्रिकोणवसुकोणस्वष्टपत्रोद्योतनागदलवृत्तमंडलं भूगृहं शिखिरवींदुभांचितं यं

त्रमेतद्वदितेषिलालयं गणेशधर्मवरुणाः कुबेरसहितः शिवे पूज्या ह्यर्चितैस्तैः पुष्पैश्चन्द्रहो
रैश्च साधकैः इन्द्राद्याश्चैव दिक्पालास्तथैशानक्रमेण च ब्राह्मी चैवेस्वर्वी देवी चंडिकाप्यप
राजिता कौमारी शंभवी चैव वाराही नारसिंहिका पूज्या वामक्रमेणैता मातृचक्रस्थमात
राः तत्रैव गुरवोभ्यर्च्यास्त्रिषु स्थानेषु साधकैः गुरुं च परमं देवि परापरगुरुं तथा परमेष्ठिगु
रुं देवि नत्वा पूज्याश्च भैरवाः संहारो भीषणो देवि कपालोन्मत्तभैरवौ क्रोधश्चण्डो रुरुश्चैवम
सितांगो महेश्वरि इत्येतान्भैरवान्देवि वसुपत्रेषु पूजयेत् ब्राह्म्याद्या मातरो यत्र तत्र संपूजये
त्सदा भैरवान्दक्षिणे ह्यस्मा मातृचक्रं च वामतः श्यामा कामा च चार्वंगी देवी चदंकधारिणी
तारा च पार्वती देवि संपूज्या रुक्मिणी शिवा वामावर्तक्रमेणैव वसुकोणगतः शिवे कालिका
त्रिपुरा दुर्गा पूज्या मध्यत्रिकोणगाः ईशानक्रमयोगेन यथाभीष्टफलप्रदः मध्ये श्रीशारिका दे
वी वामदेवांकमध्यगा मकारैः पंचभिः कौलैः कुलाचारपरायणः संपूजयेन्महादेवि साधको मं
त्रसाधकः वरं चक्रं च खड्गं च पूजयेदभयं तथा विदीर्गंधाक्षतैः पुष्पैर्धूपदीपादितर्पणैः नै
वेद्याचमनीयाद्यैस्ताम्बूलैश्च सुवासितैः लयांगमिदमाख्यातं प्रयोगं शृणु पार्वति स्तंभनं मो

श्री
१०

हननंचैवमारणाकर्षणेतथा वशीकारंतथोच्चाटंशांतिकंपौष्टिकंपरं एतेषांसाधनंवह्निरहस्यं
परमाद्भुतं येनसाधनमात्रेणसाधकोभैरवोभवेत् रवौस्नात्वाशिवेक्ष्यपेकृत्वाकर्मीद्भिकेत
दा अर्धरात्रेनिराहारोजपेन्मूलंचतद्यथे अयुतंनियमोनैवदशांशंहोममाचरेत् घृतवा
स्नाशर्करामोदकक्ककलासादिभिः शिवे ब्रह्माहरिशिवोजिष्णुस्तंभवान्भवतिध्रुवं चंद्रेमध्या
ह्नवेलायांवीतसीमूलमंडले त्रिकोणमंडलंकृत्वाश्रीचक्रेपूजयेत्ततः अयुतंप्रजपेन्मूलं
नियमेनसुरेश्वरि हूयेदाज्यपयोमत्स्यकर्पूरासवतज्जदाः शीतोऽघृतेनदेवेशिभस्मनाति
लकंचरेत् तस्यदर्शनमात्रेणत्रैलोक्यंमोहमेष्यति भौमेनिशायांवैगत्वाश्मशानमयुतंजपे
त् चितायांतत्रदीप्तायांहूयेदाज्यंसगोमयं शमीमूलेनरास्थीनिशत्रून्मरणमेवव्रजेत् बु
धेगत्वावनंदेविवटाश्वत्थतलेजपेत् अयुतंमूलमेकाकीहूयेत्पुष्पोश्वयंमितं माज्यंमाम
वरक्तंचपुष्पाणिचमहेश्वरि मीनकापीनवक्षोजाप्रातःप्रादुर्भविष्यति गुरौगत्वाग्रावामी
नोजपेन्मूलेचतद्यथे अयुतंवायुतार्धवाहूयेत्मांयसमासवं स्वयेचासकलोलालतःसा
ज्येताह्नलमिश्रितं इंद्रादिनियमवरुणानिलनिर्ऋतिविघ्नदाः सेश्वराःसद्यमातस्यवशमेष्यंत्यसं

शयं शुक्रेऽर्धरात्रे विष्णुं वा गत्वा प्रेतालये परं एकाकी प्रजपेत्तत्र कृत्वा पानं जने शिवे अष्ट
तैलचितावह्नौ हूयेदाज्यं समकेतुकं चितांगारचये देवि रिपोरुच्चाटनं भवेत् शनौ मध्याह्नसम
ये स्नात्वा कृत्वाह्निकीं क्रियां गत्वा देवालये देवि देवीं ध्यात्वा यथाविधि तदग्रे प्रजपेद्यंत्रं जपे
न्मूलमथायुतं तत्र त्रिकोणकुंडे तैलं हूयेदाज्यं सभैरवं रुरुमांसेकले शनिकृत्कूटस्य शिरस्त
था सद्यः सर्वसयानां च शांतिर्भवति पार्वति अष्टम्यां च चतुर्दश्यां गत्वा प्रेतालये शिवे
जपेदयुतमर्धं वा हूयेत् पायसशर्करां मद्वीकां त्रीश्च मध्वादीन् महाशुद्धिप्रजायते इत्येष विधि
राख्यातः सर्वतंत्रेषु गोपितः नाख्येयो न च दृष्टव्यो योगिनीचक्रपूजकैः इत्ययं पटलो गुह्यः
सकलागमसारवान् रहस्यभूतो मे देवि गोपनीयो मुमुक्षुभिः इति श्रीरुद्रयामले तंत्रे दशवि
द्यारहस्ये श्रीशारिकाभगवतीपटलः समाप्तः ॥

(२) अथ हवनविधिः तीर्थेस्नेयं तीर्थमेव समानानां भवति मानः शंस्योवररुषो धूर्ते प्राणङ्म
र्त्यस्य रक्षाणो ब्रह्मणस्पते. वसोः पवित्रमसि शतधारं वसोः सहस्रधारमयक्ष्मा वः प्रजया
संसृजामि रायस्पोषेण बहुला भवंति इति हस्तपादादिषु च स्नानी मंत्रः परमात्मने पंचभूता

त्मनेमंत्रनाथायाधारशक्त्यै स्वात्मनेशिवशक्तिस्वरूपायगंधोनमः अर्घोनमः पुष्पंनमः
श्री स्वप्रकाशोमहादीपःसर्वतस्तिमिरापहः सबाह्याभ्यंतरंज्योतिर्दीपोयंप्रतिगृह्यतां, वनस्प ॥
११ तिरसोत्पन्नोगंधाढ्योगंधउत्तमः आघ्रेयःसर्वदेवानांधूपोयंप्रतिगृह्यतां नमोधर्मनिधाना
यनमःस्वकृतसाक्षिणे नमःप्रत्यक्षदेवायभास्करायनमोनमः, यत्रास्तिमातानपितानबंधु
र्भ्रातापिनोयत्रसुहृज्जनश्च नज्ञायतेयत्रदिनंनरात्रिस्तत्रापिदीपंशरणंप्रपद्ये ॐतत्सत्
अद्यमासोत्तमेमासे अमुकपक्षे तिथावमुकायां आत्मनःवाङ्मनःकायोपार्जितपापनिवार
णार्थंअमुकगोत्रः अमुकशर्माहं श्रीमदिष्टदेवीमंत्रसिद्ध्यर्थं मनोरथसिद्ध्यर्थं निर्विघ्नसिद्धिप्रा
प्त्यर्थं कृष्णाष्टम्यादिचतुर्दशीपर्यंतं लक्षार्धसंख्याकंश्रीमहागणपतिमंत्रजपं तद्दशांशहोम
तद्दशांशतर्पणतद्दशांशमार्जनतद्दशांशब्राह्मणभोजनयुतंजपविधिनाद्विगुणीकृतंपंचांग
पुरश्चरणंकरिष्ये ॥ कृतनित्यनैमित्तिकःसाधकःहोमंसमाचरेत् तद्यथा स्वाग्रेत्रिकोणं
कुंडंनिर्वर्त्य ॐह्रींविघ्नोत्सारिण्यैनमः मूलेनाग्निंकुंडेसंयोज्य रं रं वैश्वानरायनमः मूले
भ्रुवादिभ्योहुंफट्स्वाहा इतिनैर्ऋत्यांअंगारंक्षिप्य ॐह्रींरंसःवैश्वानरलोहिताक्षत्रिनेत्रस्वा

गच्छ ज्वालामुख इहसंनिधेहि इहसंनिरुध्यस्व इहसंमुखीभव ह्रीं रं सः स्वाहा मूलं आज्यं
तेजःसमुद्दिष्टं आज्यं पापहरं परं आज्ये सुराणामाहारः आज्ये लोकः प्रतिष्ठितः दिव्यंत
रिक्षभूमीनां यत्तेकिल्विषमागतं तत्सर्वमाज्यदर्शनविनाशमुपगच्छतु तत्सत् अद्येति
श्रीशारिकाभगवतीप्रस्मैरसिद्धये पुरश्चरणाङ्गभूते होमे अमुककामनासिद्धये इदमा
ज्यमर्पयामि स्वाहा इत्याज्यवीक्षणं कृत्वा प्राणाहुतीर्दत्वा प्राणाय स्वाहा अपानाय स्वा
हा समानाय स्वाहा उदानाय स्वाहा व्यानाय स्वाहा षडङ्गाहुतीर्दद्यात् ॐ ह्रां श्रां हृदया
य नमः स्वाहा ॐ ह्रीं श्रीं शिरसे स्वाहा ॐ ह्रूं श्रूं शिखायै वषट् स्वाहा ॐ ह्रैं श्रैं कवचाय हुं स्वा
हा ॐ ह्रौं श्रौं नेत्रत्रयाय वौषट् स्वाहा ॐ ह्रः श्रः अस्त्राय फट् स्वाहा ततः दक्षकरेणाहुत
वस्तु गृहीत्वा वामेन मालामादाय हुनेत् मूलं न्यूनातिरिक्तमंत्रचक्रं तत्सर्वमस्तु स्वाहा
गुह्यातितर्पणं मूलं शिवमस्तु यजमानस्य च्छिद्रं माभूत्कदाचन देवदेव्याः प्रसादेन
रक्षरक्षास्तु मे अर्पणं अनेन मंत्रहोमेन श्रीशारिकाभगवती सांगा सासना सपरिवारा सा
लंकारा सायुधा प्रीता मे भवतु स्वाहा ईशाने भस्म संगृह्य जलमिति भस्म स्थलभस्म

श्री अग्निभस्म ॥ ॐ शिवमस्तु यजमानस्याच्छिद्रमाभूत्कदाचन इति मंत्र तिलकं कृत्वा ॐ मूलं १२
12 फट् विमुंचामि फट् परिमोच्यामि फट् परिविसृजामि मूलेनाग्रे पुष्पांजलिं दत्वा विसृजा
ग्निं तर्पयेत् कर्पूररक्तचंदनमिश्रिततोयैः ततः मार्जयेत् यजमानशीर्षैः ततः ब्राह्मणभक्तिः॥

12

(12) श्रीदेव्यै सिद्धिदायै नमः श्रीगुरवे शिवायै नमः श्रीगणपतये नमो नमः अथुना पद्धतिं वक्ष्ये
श्रीशिलार्चनसंयुतां गद्यपद्यमयीं गोप्यां सकलागमनिश्चितां प्रातः कृत्यमकृत्वा तु यो देवीं
भक्तितोर्चयेत् तस्य पूजा तु विफला शौचहीना यथा क्रिया तत्र श्रीमान्साधको ब्राह्मे मुहू
र्ते शयनतलादुत्थाय करचरणादि प्रक्षाल्याचम्य निजासने समुपविश्य निजशिरसि
श्वेतवर्णाधोमुखसहस्रदलकमलकर्णिकांतर्गत चंद्रमंडलसिंहासनोपरि निषण्णं स्व
गुरुं शुक्लवर्णं शुक्लालंकारभूषितं ज्ञानानंदमुदितमानसं सच्चिदानंदविग्रहं त्रिनय
नं चतुर्भुजं ज्ञानमुद्रापुस्तकवराभयकरं वामांगे वामहस्तधृतकमलया रक्तवसनाभ
रणया स्वशक्त्या दक्षभुजेनालिंगितं सर्वदेवादिदेवं सर्वतीर्थतीर्थं परमशिवस्वरूपं शां

तेस्तत्प्रसन्नेध्यात्वा तच्चरणकमलयुगलविगलदमृतधारया स्वात्मानंस्नुतंविभाव्य मानसोऽप
चारैराराधयेद्यथा लंपृथिव्यात्मकंगंधंसमर्पयामिनमः हंआकाशात्मकंपुष्पंसमर्पयामि
नमः यंवाय्वात्मकंधूपंसमर्पयामिनमः रंवह्न्यात्मकंदीपंसमर्पयामिनमः वंअमृतात्मकं
नानानैवेद्यंसमर्पयामिनमः संसर्वात्मकंफलमूलताम्बूलादिकंसमर्पयामिनमः ॐऐंह्रींश्रीं
हसखफ्रेंहसक्षमलवरयूंसहखफ्रेंसहक्षमलवरयीं हसौः स्हौः श्रीमच्छ्रीअमुककौलानंद
नाथश्रीपादुकां श्रीमच्छ्रीअमुकांबाश्रीपादुकांपूजयामिनमः इतिदशधाविमृश्य मनसादं
डवत्प्रणामंकुर्यात् सहस्रदलपंकजेसकलशीतरश्मिप्रभं वराभयकरांबुजेविमलगंधपु
ष्पांबरे प्रसन्नवदनेक्षणंसकलदेवतारूपिणं स्मरेच्छिरसिहंसगंतदभिधानपूर्वंगुरुं इतिध्या
त्वा प्रणाममंत्रानपठेत् नमामिसद्गुरुंशांतंप्रत्यक्षंशिवरूपिणं शिरसायोगपीठस्थंमुक्ति
कामार्थसिद्धये १ श्रीगुरुंपरमानंदंवंदाम्यानंदविग्रहं यस्यसान्निध्यमात्रेणचिदानंदायतेप
रं २ अखंडमंडलाकारंव्याप्तंयेनचराचरं तत्पदंदर्शितंयेनतस्मैश्रीगुरवेनमः प्रकाशानंद
नाथंचविमर्शानंदनाथकं आनंदानंदनाथंचदिव्यौघंगुरुमंडलं ३ श्रीज्ञानानंदनाथंचश्री

श्री
१२
13

सत्यानंदनाथकं श्रीपूर्णानंदनाथं च सिद्धौघान् प्रणमाम्यहं ५ स्वभावानंदनाथं च प्रतिभानंद १२
नाथकं सुभगानंदनाथं च मानवौघान् गुरून्भजे ६ अज्ञानतिमिरांधस्य ज्ञानांजनशलाक
या चक्षुरुन्मीलितं येन तस्मै श्रीगुरवे नमः ७ गुरुर्ब्रह्मा गुरुर्विष्णुर्गुरुः साक्षान्महेश्वरः गुरु
र्देव जगत्सर्वं तस्मै श्रीगुरवे नमः ८ नमस्ते नाथ भगवन् शिवाय गुरुरूपिणे विद्यावतारसंसि
द्ध्यै स्वीकृतानेकविग्रह ९ नवाय नवरूपाय परमार्थैकरूपिणे सर्वाज्ञानतमोभेदभानवे चि
द्घनाय ते १० स्वतंत्राय दयाक्लृप्तविग्रहाय परात्मने परतंत्राय भक्तानां भव्यानां भव्यरूपिणे
११ विवेकिनां विवेकाय विमर्शाय विमर्शिनां प्रकाशिनां प्रकाशाय ज्ञानिनां ज्ञानरूपिणे
१२ पुरस्तात्पार्श्वयोः पृष्ठे नमस्कुर्यामुपर्यधः सदा मच्चित्तरूपेण विधेहि भवदासनं १३ इति
श्रीगुरुं प्रणम्य स्वप्रसन्नं विभाव्य मनसा तदाज्ञां गृहीत्वा मूलाधारे स्वर्णवर्णचतुर्दलकम
लकर्णिकांतर्गतशृंगाटकांतर्वर्तित्रिकोणपीठोपरि परां शक्तिं कुंडलिनीं सर्पाकारां मूर्ध्वमुखीं
सार्धत्रिवलयां उद्यद्दिनकरसहस्रभास्वरां विद्युत्कोटिसन्निभां बिसतंतुतनीयसीं पंचाशद्व
र्णविग्रहां अष्टात्रिंशत्कलारूपिणीं त्रिधामधामानं सर्वप्राणिजीवां सर्वदेवाधिदेवीं सकल

मंत्रमातरं सुप्तां विभाव्य श्रीगुरूपदिष्टनिजसहजनादेन संचेतनां विधाय तत्रचतुर्दलेषु वंनमः
शंनमः षंनमः संनमः इतिपत्रेषुमध्येमूलेनचसंपूज्य प्रादक्षिण्येनसंपूज्य पूर्वोक्तमंत्रेण
कमलात्कमलेनीत्वा ततःस्वाधिष्ठानेलिंगमूले विद्रुमवर्णेषड्दलकमलेतांप्रापय्य तत्रबं
नमः भंनमः मंनमः यंनमः रंनमः लंनमः इतिपत्रेषुमध्येमूलेनचसंपूज्य ततोमणिपूरकेना
भौ नीलवर्णेदशदलकमलेतांनीत्वा तत्र डंनमः ढंनमः णंनमः तंनमः थंनमः दंनमः धंन
मः नंनमः पंनमः फंनमः इतिपत्रेषु मध्येमूलेनचसंपूज्य ततोऽनाहतेवक्षसि कपिलवर्णे
द्वादशदलकमलेतांनीत्वा तत्र कंनमः खंनमः गंनमः घंनमः ङंनमः चंनमः छंनमः जंनमः
झंनमः ञंनमः टंनमः ठंनमः इतिपत्रेषुमध्येमूलेनचप्रपूज्य ततोविशुद्धौकण्ठे धूम्रवर्णेषोड
शदलकमलेतांनीत्वा तत्रअंनमः आंनमः इंनमः ईंनमः उंनमः ऊंनमः ऋंनमः ॠंनमः ऌंनमः
ॡंनमः एंनमः ऐंनमः ओंनमः औंनमः अंनमः अःनमः इतिपत्रेषुमध्येमूलेनचसंपूज्य ततोभ्रूम
ध्येआज्ञाचक्रेविद्युद्वर्णेद्विदलकमलेतांनीत्वा तत्र हंनमः क्षंनमः इतिपत्रयोर्मध्येमूलेनच
संपूज्य ततोब्रह्मरंध्रगतसहस्रदलकमलेतांप्रापय्य तत्रबिंदुरूपतेजोमयपरमशिवेनसंहैक

तांनीत्वा ततःस्रवतापरमामृतेनतांसंतर्प्य तत्रनादश्रवणतत्परोमुहूर्तंलयंविभाव्य ततोऽ
वरोहेसर्वत्रसोऽहमितिमंत्रेण कमलात्कमलेष्ववरोहमाणमाज्ञाचक्रादिक्रमेण तेषुतेषुकम
लेषुतैस्तैरत्नैःसंपूज्यमाना तत्तदाधारतत्तद्धामतत्तद्वर्ण तत्तदधिदेवताःसंतर्पयंती मूलाधारं
प्रापय्य तत्रैवस्वस्थानेसंस्थापयेत् इत्यारोहावरोहणक्रमेण परांशक्तिंकुंडलिनींध्यात्वा प्रका
शमानांप्रथमेप्रयाणे प्रतिप्रयाणेप्यमृतायमानां अंतःपदव्यामनुसंचरंतीमानंदरूपामवलो
प्रपद्ये इतिस्तुत्वा नाहमस्मिनचान्योस्तिध्येयंचात्रनविद्यते आनंदपदसंलीनेमनःसमरसीगतं
ततस्तत्तेजसाव्याप्तेस्वदेहेविचिंत्य तत्तेजसैवपरिणतांश्रीपरदेवतांध्यात्वा मानसोपचारैस्सं
पूज्य प्राणायामत्रयंकृत्वा तद्विधिर्यथा अथविहितपद्माद्यासनोमूलाधारार्पितचित्तवृत्ति
र्मूलप्रणवंवाषोडशवारमुच्चरन् दक्षांगुष्ठेन दक्षनासापुटंनिरुध्य वामेनपवनेपूरयेत् ततस्त
मेवचतुष्षष्टिवारमुच्चरन् दक्षानामाकनिष्ठाभ्यां वामंपुटंचनिरुध्य द्वाभ्यांपवनंकुंभयेत् त
तस्तमेवद्वात्रिंशद्वारमुच्चरन् दक्षेणशनैःपवनंरेचयेत् इडयापिवषोडशभिःपवनंकुरुषष्टि
चतुष्टयमंतरगं त्यजपिंगलयाशनकैःशनकैर्दशभिर्दशभिर्दशभिर्द्वीपिकैः इत्येकःप्राणा

यामः एषएवविपर्ययेण क्रियमाणोद्वितीयः प्रथमवत्तृतीयः इत्थंप्राणायामत्रयेण निर
स्तसकलकल्मषेस्वदेहेदेवताराधनयोग्येविभाव्य स्वमूलमंत्रस्य ऋष्यादिस्मरणेविदधीतय
था अस्यश्रीशारिकाभगवतीमंत्रराजस्य श्रीमहादेवऋषिः त्रिष्टुप्छंदः श्रीशारिकाभग
वतीदेवता शंबीजं श्रींशक्तिः फ्रांकीलकं धर्मार्थकाममोक्षार्थे श्रीजपेविनियोगः इतिकृ
तांजलिः स्मृत्वान्यसेत् श्रीमहादेवऋषयेनमः शिरसि त्रिष्टुप्छन्दसेनमोमुखे श्रीशारिका
भगवतीदेवतायेनमोहृदि शंबीजायनमोगुह्ये श्रींशक्तयेनमःपादयोः फ्रांकीलकायन
मोनाभौ धर्मार्थकाममोक्षार्थेजपेविनियोगःसर्वांगेषु इतिऋष्यादिन्यासः अथकरन्यासः
ॐह्रांश्रांअंगुष्ठाभ्यांनमः ॐह्रींश्रींतर्जनीभ्यांस्वाहा ॐह्रूंश्रूंमध्यमाभ्यांवषट् ॐह्रैंश्रैंअनामिकाभ्यां
हुं ॐह्रौंश्रौंकनिष्ठिकाभ्यांवौषट् ॐह्रःश्रःकरतलकरपृष्ठाभ्यांफट् ॐह्रांश्रांहृदयायनमः ॐह्रीं
श्रींशिरसेस्वाहा ॐह्रूंश्रूंशिखायैवषट् ॐह्रैंश्रैंकवचायहुं ॐह्रौंश्रौंनेत्रत्रयायवौषट् ॐह्रःश्रः
अस्त्रायफट् अथध्यानं बालार्ककोटिद्युतिमिंदुचूडांवरासिचक्राभयबाहुमाद्यां सिंहाधिरू
ढांशिववामदेहलीनांभजेचेतसिशारिकेशीं इतिस्वहृदयकमले श्रीपरदेवतांस्वाभेदेनध्या

श्री
१५
15

त्वा मानसैरुपचारैः संपूज्य वक्ष्यमाणोत्कीलनादिमंत्रान् श्रीभैरवमंत्रंच जप्त्वा मालामादाय १५
ॐ मां माले महामाये सर्वशक्तिस्वरूपिणि चतुर्वर्गस्त्वयि न्यस्तस्तस्मान्मे सिद्धिदा भव ॐ सिद्ध्यै
नमः इति मनसा गंधादिना तामपि संपूज्य गं अविघ्नं कुरु माले त्वं इति दक्षकरेण गृहीत्वा शि
रसि गुरुं श्वेतवर्णं कंठे पीतवर्णं मूलविद्यां हृदि यथोक्तरूपां श्रीदेवीं ध्यायन् यथाशक्ति जपं वि
धाय जपांते त्वं माले सर्वदेवानां प्रीतिदा शुभदा भव शुभं कुरुष्व मे भद्रे यशो वीर्यं च सर्वदा इति
हृदेतः पठित्वा मालां शिरसि संस्थाप्य पुनरपि पूर्ववत्प्राणायामत्रयं ऋष्यादिकरषडंगन्यासा
न् विधाय गुह्यातिगुह्यगोप्त्री त्वं गृहाणास्मत्कृतं जपं सिद्धिर्भवतु मे देवि त्वत्प्रसादान्महेश्वरि
इत्यनेन तेजोमयं जपफलं श्रीदेवीवामहस्ते समर्प्य योनिमुद्रया प्रणमेत् प्रातः प्रभृति सायांतं
सायादि प्रातरंतं ततः यत्करोमि जगद्योने तदस्तु तव पूजनं इति निजकृत्यं समर्प्य स्वाकार्यानुष्ठा
नाय ॐ त्रैलोक्यचैतन्यमये सुरेशि श्रीशारिके त्वच्चरणाज्ञयैव प्रातः समुत्थाय तव प्रियार्थं सं
सारयात्रामनुवर्तयिष्ये संसारयात्रामनुवर्तमानं श्रीशारिके त्वच्चरणाज्ञयालं स्पर्धातिरस्कार
कलिप्रमादभयानि मां माभिभवंतु मातः जानामि धर्मं न च मे प्रवृत्तिर्जानाम्यधर्मं न च मे निवृत्तिः

त्वया हृषीकेश हृदिस्थयाहं यथा नियुक्तोऽस्मि तथा करोमि इति श्रीदेव्याज्ञां संप्रार्थ्य मू
लाधारादिद्वादशान्तचक्रपर्यन्तस्थिताभ्यो गणपतिप्रभृतिदेवताभ्यो गुरूपदेशज्ञातं सह
जसिद्धमजपाजपं समर्पयेद्यथा ॐ अद्य पूर्वेद्युरहोरात्राचरितमुच्छ्वासनिःश्वासात्मकं षट्
शताधिकमेकविंशतिसहस्रसंख्याकमजपाजपं मूलाधारस्वाधिष्ठानमणिपूरानाहतविशु
द्धाज्ञाब्रह्मरंध्रेषु चतुर्दलषड्दलदशदलद्वादशदलषोडशदलद्विदलसहस्रदलेषु स्वर्णवि
द्रुमनीलपिंगलधूम्रविद्युत्कर्पूरवर्णेषु स्थिताभ्यो गणपतिब्रह्मविष्णुरुद्रजीवात्मपरमात्म
श्रीगुरुपादुकाभ्यो यथाभागशः समर्पयामि इति कृताञ्जलिः संकल्प्य समर्पयेत् ॐ ऐं ह्रीं
श्रीं मूलाधारचक्रस्थाय गणपतयेऽजपाजपानां षट्शतानि समर्पयामि नमः धँ स्वाधिष्ठान
चक्रस्थाय ब्रह्मणेऽजपाजपानां षट्सहस्राणि समर्पयामि नमः धँ मणिपूरकचक्रस्थाय
विष्णवेऽजपाजपानां षट्सहस्राणि समर्पयामि नमः धँ अनाहतचक्रस्थाय रुद्रायाऽज
पाजपानां षट्सहस्राणि समर्पयामि नमः धँ विशुद्धचक्रस्थाय जीवात्मनेऽजपाजपानां
सहस्रं समर्पयामि नमः धँ आज्ञाचक्रस्थाय परमात्मनेऽजपाजपानां सहस्रं समर्पयामि

नमः ॐ सहस्रदलकमलकर्णिकामध्यवर्तिन्यै श्रीगुरुपादुकायै अजपाजपानां सहस्रं
समर्पयामि नमः इत्यजपाजपं समर्प्य ॐ अद्य सूर्योदयमारभ्य आगामिसूर्योदयं यावत्
अहोरात्रेणोच्छ्वासनिःश्वासात्मकं षट्शताधिकमेकविंशतिसहस्रसंख्याकमजपा
जपमहं करिष्ये इति कृताञ्जलिः संकल्प्य अजपामन्त्रेण प्राणायामं विधाय अस्य श्री
अजपागायत्रीमन्त्रस्य हंस ऋषिः अव्यक्तगायत्रीछन्दः परमात्मा देवता हं बीजं सः
शक्तिः सोऽहं कीलकं मम मुक्तिसाधने जपे विनियोगः स्वशिरसि ॐ हंसात्मने ऋषये
नमः मुखे ॐ अव्यक्तगायत्रीच्छन्दसे नमः हृदये ॐ परमात्मदेवतायै नमः मूलाधारे ॐ
हं बीजाय नमः पादयोः ॐ सः शक्तये नमः नाभौ ॐ सोऽहं कीलकाय नमः हृदि ॐ ओंका
रतत्त्वाय नमः कण्ठे ॐ उदात्ताय स्वराय नमः मूर्ध्नि ॐ नभसे स्थानाय नमः ॐ हैमायव
र्णाय नमः इति विन्यस्य मम मोक्षार्थे जपे विनियोगः इति कृताञ्जलिर्वदेत् ॐ ह्सां सू
र्यात्मने स्वाहा अङ्गुष्ठाभ्यां नमः ॐ ह्सीं सोमात्मने स्वाहा तर्जनीभ्यां स्वाहा ॐ ह्सूं निरंज
नात्मने स्वाहा मध्यमाभ्यां वषट् ॐ ह्सैं निराभासात्मने स्वाहा अनामिकाभ्यां हुं ॐ ह्सौंः

अनंततनुःसूक्ष्मादेवीप्रचोदयात्स्वाहा कनिष्ठिकाभ्यांवौषट् ॐ ह्सः अव्यक्तबोधात्मनेस्वा
हा करतलकरपृष्ठाभ्यांफट् इतिकरन्यासः ॐ ह्सां सूर्यात्मनेस्वाहा हृदयायनमः ॐ
ह्सीं सोमात्मनेस्वाहा शिरसेस्वाहा ॐ ह्सूं निरंजनात्मनेस्वाहा शिखायैवषट् ॐ ह्सैं निरा
भासात्मनेस्वाहा कवचायहुं ॐ ह्सौं अनंततनुःसूक्ष्मादेवीप्रचोदयात्स्वाहा नेत्राभ्यांवौष
ट् ॐ ह्सः अव्यक्तबोधात्मनेस्वाहा अस्त्रायफट् इतिषडंगन्यासंकृत्वा ध्यानंकुर्यात्
यां मूर्धानं यस्य विप्रा वदंति खं वै नाभिं चेन्दुसूर्यौ च नेत्रे दिग्भिः श्रोत्रे यस्य पादौ क्षितिश्च
ध्यातव्योसौ सर्वभूतान्तरात्मा इति विराट्स्वरूपं स्वात्मानं ध्यात्वा तदनुसंधायी प्राण
वायोर्निर्गमप्रवेशनात्मकं अजपामंत्रं पंचविंशतिवारं जप्त्वा समर्प्य श्रीगुरूपदिष्टमा
र्गेण नादानुसंधानपूर्वकं निरस्तसमस्तोपाधिना केनापि चिद्विलासेन प्रवर्तमानोस्मी
ति विभाव्य स्वकार्यानुष्ठानाय सगुडमेखलेदेवि पर्वतस्तनमंडले विष्णुपत्नि नमस्तु
भ्यं पादस्पर्शं क्षमस्व मे इति भूमिं प्रार्थ्य श्वासानुसारेण तत्पादं निधाय नंदंतु साध
काः सर्वे विनश्यंतु विदूषकाः अवस्था शांभवी मेस्तु प्रसन्नोस्तु गुरुः सदा इत्यादि व

श्री
१८

दन्वहिर्गत्वा मलमूत्रोत्सर्गशौचाचमनं विधाय क्लींकामदेवाय सर्वजनप्रियाय नमः
इति दंतधावनं कुर्यात् ततो नद्यादौ गत्वा वैदिकस्नानं निर्वर्त्य तांत्रिकमारभेत यथा
तत्रादौ मूलेन करचरणमुखानि प्रक्षाल्य ॐ मणिधरि वज्रिणि महाप्रतिसरे रक्ष रक्ष हुं फ
ट् स्वाहा इति शिखां बद्ध्वा आचमनत्रयं कुर्यात् मूलं आत्मतत्त्वं शोधयामि स्वाहा मूलं
विद्यातत्त्वं शोधयामि स्वाहा मूलं शिवतत्त्वं शोधयामि स्वाहा इत्याचम्य मलापकर्षण
स्नानं विधाय पुनराचम्य नाभिमात्रे जले स्थित्वा ॐ अद्यामुकमासस्येत्यादि श्रीअमुकदे
वीप्रीत्यर्थं तांत्रिकस्नानमहं करिष्ये इति संकल्प्य प्राणायामं कृत्वा स्वमूलऋष्यादिक
रषडंगन्यासांश्च कृत्वा स्वपुरतो जले हस्तमात्रं चतुरस्रं तीर्थं परिकल्प्य ॐ ब्रह्मांडोद
रतीर्थानि करैः स्पृष्टानि ते रवे तेन सत्येन देवेश तीर्थं देहि दिवाकर इति सूर्यात्तीर्थं प्रा
र्थ्य क्रों इत्यंकुशमुद्रया सूर्यमंडलं भित्त्वा गंगे च यमुने चैव गोदावरि सरस्वति नर्मदे सिं
धुकावेरि जलेऽस्मिन् सन्निधिं कुरु इति सूर्यमंडलात्तीर्थमावाह्य पुरः कल्पिततीर्थे सं
योज्य पुनः सूर्यमंडलादेव ह्रां ह्रीं ह्रूं ह्रैं ह्रौं ह्रः सर्वानंदमये तीर्थशक्ते एह्येहि स्वाहा इति

तीर्थशक्तिमावाह्य तस्मिंस्तीर्थमंडले तां ध्यायेद्यथा सर्वानंदमयीमशेषदुरितध्वंसां मृगां
कप्रभां अब्जं चोर्ध्वकरद्वयेन दधतीं पाशं सृणिं च क्रमात् दोर्भ्यां चामृतपूर्णहेमकलशं शुक्लाब्ज
मालांबरां गंगासिंधुसरिद्वयादिसहितां श्रीतीर्थशक्तिं भजे इति ध्यात्वा ॐ नमो भगवति
अंबे अंबालिके अंबिके महामालिनि एह्येहि भगवति अशेषतीर्थालवाले ह्रीं शिवजटाधिरू
ढे गंगे गंगांबिके स्वाहा इति मंत्रेणामृतधाभिमंत्र्य ह्रीं इत्यालोड्य वमित्यमृतेशमुद्रयाऽमृ
तीकृत्य ॐ आत्मतत्त्वाय नमः विद्यातत्त्वाय नमः शिवतत्त्वाय नमः इति तत्त्वत्रयं जले वि
न्यस्य तत्र श्रीचक्रं विभाव्य तत्र स्वहृदयकमलाद्देवीमावाह्य षडंगेन सकलीकृत्य क्रों
भगमुद्रया तां सावरणां स्नपयित्वा योनिमुद्रया मूलेन तज्जलमष्टधाऽभिमंत्र्य तत्र मूलमं
त्रस्मरणपूर्वकं त्रिर्निमज्ज्योन्मज्जेत् ततः क्रों भगमुद्रया मूलमंत्रं पठन् स्वशिरसि त्रिरभिषिच्य
मूलेन देवीं त्रिः संतर्प्य श्रीदेवीं स्वहृदि समानीय मूलं आत्मतत्त्वं शोधयामि स्वाहा मूलं वि
द्यातत्त्वं शोधयामि स्वाहा मूलं शिवतत्त्वं शोधयामि स्वाहा इति त्रिराचम्य तीरमारुह्य
धौते वाससी परिधाय त्रिपुंड्रकमूर्ध्वपुंड्रकं वा तिलकं विधाय इति स्नानविधिः अथ सं

श्री
१८
18

ध्या तत्र पूर्ववदाचम्य मूलेन त्रिखंडां बद्ध्वा प्राणायामकरण्यादिकरषडंगन्यासान् विधाय
स्वपुरतो तथैव रचितं तीर्थजलममृतमुद्रयामृतीकृत्य मूलेनाष्टधाऽभिमंत्र्य तेन जलेन
ॐ नमः इत्यादिस्तेन नमः इत्येतर्मातृकाक्षरैः स्वशिरः प्रोक्ष्य मूलेन च त्रिः संप्रोक्ष्य दक्षहस्ते
जलमादाय वामेनाच्छाद्य लं वं रं यं हं इति पांचभौतिकमंत्रैः सप्तवारमभिमंत्र्य मूलेन त्रि
रभिमंत्र्य मूलमुच्चरन् वामहस्तकृत तत्त्वमुद्रया मूर्ध्नि त्रिधाभ्युक्ष्य अवशिष्टं जलं वामहस्ते
निधाय तेजोरूपं तज्जलमिडयाकृष्य स्वदेहांतःस्थितं सकलकलुषं प्रक्षाल्य तज्जलं कृ
ष्णवर्णं पिंगलया बहिर्निर्गतं मत्वा पुनः दक्षहस्ते कृत्वा वामभागे ज्वलद्वज्रशिलां ध्यात्वा
ॐ ह्रीं पशु हुं फट् इति पाशुपतास्त्रमंत्रेण तस्यां शिलायामास्फाल्य हस्तौ प्रक्षाल्य मूले
न जलमादाय प्रवहन्नाड्या सहस्रदलपरमामृतेनैकीभूतं विभाव्य निर्गमय्य तेन ज
लेन अमृतमालिन्यै स्वाहा इति कुशैः स्वशिरस्त्रिः संप्रोक्ष्य ॐ आत्मतत्त्वं शोधयामि स्वा
हा ॐ विद्यातत्त्वं शोधयामि स्वाहा ॐ शिवतत्त्वं शोधयामि स्वाहा ॐ मूलं सर्वतत्त्वं शोधया
मि स्वाहा ॐ ह्रां ह्रीं हंसः श्रीमार्तंडभैरवाय प्रकाशशक्तिसहिताय इदमर्घ्यं परिकल्प

यामि स्वाहा इति त्रिरर्घ्यं कुलसूर्याय दत्वा हृत्पद्मात्सूर्यमंडले मूलदेवीं नीत्वा तत्र वि
धिवद्ध्यात्वा ॐ ह्रीं शारिकायै विद्महे महामायायै धीमहि तन्नः शारी प्रचोदयात् इति मूलगा
यत्रीं अनया च तत्स्वसंध्यासु सूर्यमंडले मूलदेव्यै रर्घ्यं दत्वा ततः प्राणायाममंत्रन्यासादि करष
डंगं विधाय मूलेन यथाशक्ति जपं कृत्वा मूलगायत्रीमपि जप्त्वा पुनः प्राणायामादिना जपं
समर्प्य श्रीदेवीवामहस्ते अथ सूर्यमंडलाद्देवीं स्वरूपमानीय हृदि ध्यायेत् इति संध्या । अ
थ तर्पणं पूर्ववदाचम्य प्राणायामादि कृत्वा प्रोक्तविधिना विदिततीर्थजले यंत्रं विभाव्य
तत्र देवीं हृदयात् सपरिवारामानीय षडंगेन सकलीकृत्य कुंडलिन्याः प्रयोगेनामृतेनाभि
षिच्य विधिवत् प्रपूज्य ऐशान्यां ॐ ऐं ह्रीं श्रीं गुरुक्रमकानंदनाथभैरवस्तर्पयतामिति त्रिः
वह्नौ परमगुरुं नैरृत्यां परमाचार्यो वायवे परमेष्ठिगुरुं संतर्प्य त्रिः संकृत्वा दिव्यसिद्धौ
घमानवौघगुरूनपि संतर्प्य विंदौ मूले श्रीवामदेवभैरवसहितां श्रीशारिकाभगवतीं दे
वीं सपरिवारां सानुचरां सवाहनां तर्पयतामिति मध्ये त्रिः संतर्प्य परिवारदेवताः संतर्प्य प्रा
णायामादि विधाय देवीं स्वहृदि विसृज्य तीर्थं स्वस्थाने विसर्जेत् चक्रमुद्रां प्रदर्श्य नमो

श्री धर्मनिदानाय नमः स्वकृतसाक्षिणे नमः प्रत्यक्षदेवाय भास्कराय नमो नमः इति सूर्याया
१८ र्घ्यं दद्यात इति तर्पणं ततः मूलेन जलशुद्धिं कमंडले कृत्वा मूलं स्मरन् यागगेहमागत्य ह
स्तपादौ प्रक्षाल्य आचम्य द्वारसमीपे सामान्यार्घ्यजलगंधादिना कृत्वा तेन द्वारदेवताः स
19 मर्चयेत् यथा ॐ ह्रीं द्वारश्रियै नमः ऊर्ध्वे गं गणपतये नमः दक्षे क्षं क्षेत्रपालाय नमः वामे धं
धात्रे नमः दक्षे वं विधात्रे नमः वामे गं गंगायै नमः दक्षे यं यमुनायै नमः वामे शं शंखनिध
ये नमः दक्षे पं पद्मनिधये नमः वामे अस्त्राय फट् इति नमः देहल्यां वास्तुपुरुषाय नमः
मध्ये इति समभ्यर्च्य वामांगसंकोचेन वामपादपुरःसरं ततः प्रविश्य तत्रासनमास्तीर्य
तत्र ह्रीं आधारशक्तये नमः इति संपूज्य अस्य श्री आसनशोधनमंत्रस्य मेरुपृष्ठऋषिः
सुतलं छंदः कूर्मो देवता आसनशोधने विनियोगः मेरुपृष्ठऋषये नमः शिरसि सुतलं
छंदसे नमो मुखे कूर्मो देवतायै नमो हृदि आसनशोधने विनियोगः सर्वांगेषु पृथ्वि त्व
या धृता लोका देवि त्वं विष्णुना धृता त्वं च धारय मां देवि पवित्रं कुरु चासनं इत्यभिमंत्र्य
संविदं यथामंत्रं स्वीकुर्यात् संविदे ब्रह्मसंभूते ब्रह्मपुत्रि सदानघे ब्राह्मणानां च तृप्त्यर्थं प

विद्याभव सर्वदा ॐ ब्राह्मण्यै नमः स्वाहा सिद्धमूर्त्ये त्वये देवि हीनबुद्धिप्रबोधिनि राजप्रजाव
शंकारि शत्रुपक्षनिसूदिनि ऐं त्वचियायै नमः स्वाहा अज्ञानेंधनदीप्ताग्निज्ञाना ग्निब्रह्मरू
पिणि आनंदस्याहुतिं प्रीतिं सम्यग्ज्ञाने प्रयच्छ मे ह्रीं वैष्णव्यै नमः स्वाहा नमस्यामि नमस्या
मियोगमार्गप्रदर्शिनि त्रैलोक्यविजयी मातः समाधिफलदा भव क्लीं मृड्यै नमः स्वाहा इ
त्यभिमंत्र्य ॐ अमृते अमृतोद्भवे अमृतवर्षिणि अमृतमाकर्षय २ सिद्धिं देहि श्रीशारिकाभग
वती पदे मे वशमानय स्वाहा इति तदुपरि सप्तधा मूलेन जप्त्वा धेनुमुद्रयाऽमृतीकृत्य योनि
मुद्रां प्रदर्श्य आगच्छ २ संतिष्ठ २ सन्निधेहि २ सन्निरुध्यस्व २ संमुखी भव २ इत्यावाहनादि
मुद्रां प्रदर्श्य अवगुंठ्य छोटिकाभिर्दशदिग्बंधनं विधाय ऐं वद वद वाग्वादिनि मम जिह्वा
ग्रे स्थिरीभव सर्ववशंकरि स्वाहा इत्यनेन गुरुं विज्ञाप्य ततश्चानंदमयो भूत्वा अपसर्पंतु ते
भूता ये भूता भुवि संस्थिताः ये भूता विघ्नकर्तारस्ते नश्यंतु शिवाज्ञया पाषोडकारिणो भूता
भूता भूम्यंतरिक्षगाः दिवि लोके स्थिता ये च ते नश्यंतु शिवाज्ञया इति तर्जनीमध्यमाभ्यामू
र्ध्वोर्ध्वं तालत्रयदानेन वामपार्ष्णिघातत्रयेण दिव्यदृष्ट्या च त्रिविधविघ्नानुत्सार्य छोटिकाभि

श्री
२०

20

दिग्बंधं कृत्वा चतुर्दिक्षु वह्निप्रकारं संचिंत्य प्राणायामत्रयं कुर्यात् तत्र प्रणवं षोडशवार
मुच्चरन् दक्षनासाकनिष्ठाभ्यां वामपुटं च निरुध्य दक्षेण पवनं कुंभयेत् ततस्तमेव द्वात्रिंशद्वार
मुच्चरन् वामपुटं तथैव निरुध्य दक्षेण पवनं रेचयेत् इत्येकः प्राणायामः एवं एव विपर्यये
न द्वितीयः प्रथमवत् तृतीयः इत्थं प्राणायामत्रयेण निरस्तसकलकल्मषं स्वदेहं देवताराध
नयोग्यं विभाव्य भूतशुद्धिं कुर्यात् मूलाधारादेः सं इति मंत्रेण कुंडलिनीं पृथिव्या सह स्वाधिष्ठा
ने समानीय तत्र जले पृथ्वीं लीनां विभाव्य तस्माज्जलेन सह मणिपूरे समानीय तत्र वह्नौ जलं
लीनं विभाव्य तस्माद्वह्निना सहानाहते समानीय तत्र वायौ वह्निं लीनं विचिंत्य तस्माद्वायुना
सह विशुद्धे समानीय तत्रस्थाकाशे वायुं लीनं विचिंत्य तस्मादाकाशेन सहाज्ञाचक्रे समानी
य तत्रस्थमनस्याकाशं लीनं संचिंत्य मनो नादे लीनं विभाव्य ध्वनौ ध्वनिं समर्प्य सहस्रदल
कर्णिकास्थचंद्रमंडलमध्यगतत्रिकोणांतर्गततेजोमयबिंदुरूपपरमशिवे तां समर्प्य प्रा
णायामविधिना यमिति वायुबीजं धूम्रवर्णं षोडशवारं जपन् तत्र शरीरे पापपुरुषं वाम
कुक्षिस्थितं पापपुरुषं कज्जलप्रभं ब्रह्महत्याशिरस्कं च स्वर्णस्तेयभुजद्वयं सुरापानहृ

दायुक्तं गुरुतल्पकटिद्वयं तत्संसर्गपादद्वयं देहमेगप्रत्यंगपातकं उपपातकरोमाणं रक्तश्मश्रु
विलोचनं खड्गचर्मधरं कृष्णं पापं कुक्षौ विचिंतयेत् इति विचिंत्य तं संशोष्य रमिति वह्नि
बीजेन रक्तवर्णेन ततः षष्टिवारं जपंस्तमेव संदह्य वमित्यमृतबीजेन शुक्लवर्णेन सहस्रारे विचिं
त्य द्वात्रिंशद्वारं जपंस्तद्भस्मामृतद्रष्टानिष्पाद्य शरीरमुत्पाद्य ललाटस्थलमिति पृथ्वीबीजे
न पीतवर्णेन सुदृढीकृत्य हमित्याकाशबीजेन व्यापकत्वं विचिंत्य ह्रीमिति शूलस्थवी
जेन संस्थैर्यं विधाय सोहमिति मंत्रेण कुंडलिनीममृतलोलीभूतां पंचमहाभूतानि जीवात्मा
नं च ब्रह्मपथेन स्वस्थाने नियोजयेत् ततो देवतारूपं स्वात्मानं विचिंत्य हृदि हस्तं दत्त्वा
प्राणप्रतिष्ठां कुर्यात् ॐ आं ह्रीं क्रों यं रं लं वं शं षं सं हं हंसः सोहं श्रीशारिका भगवतीप्रा
णा इह प्राणाः ॐ जीव इह स्थितः ॐ सर्वेंद्रियाणि इह स्थितानि ॐ वाङ्मनः त्वक्च
क्षुः श्रोत्रघ्राणप्राणा इहागत्य सुखं चिरं तिष्ठंतु स्वाहा इति प्राणप्रतिष्ठां विधाय मातृका
न्यासं कुर्यात् स्वरैः पूरकः कादिमांतैः कुंभकः यादिभिः रेचकः तत्रादावंतर्मातृकान्या
सः अस्य श्रीअंतर्मातृकान्यासस्य ब्रह्माऋषिः गायत्रंछंदः श्रीअंतर्मातृकासरस्व

श्री
२१

तीदेवता हलोबीजानि स्वराःशक्तयः अव्यक्तंकीलकं ममश्रीशारिकाभगवतीमंत्रोग
त्वेनन्यासेविनियोगः इतिकृतांजलिःस्मरत्वान्यसेत् ब्रह्मऋषयेनमःशिरसि गायत्रेछ्
दसेनमोमुखे श्रीश्वेतमातृकासरस्वतीदेवतायेनमः हृदि हलेभ्योबीजेभ्योनमःगुह्ये
स्वराःशक्तिभ्योनमःपादयोः अव्यक्तकीलकायेनमःनाभौ न्यासेविनियोगःसर्वांगेषु
इतिऋष्यादिन्यासः ॐऐंह्रीं श्रीं अंकंखंगंघंङं आं अंगुष्ठाभ्यांनमः धंइंचंपंईंतर्जनीभ्यां
स्वाहा धंउंटंपंऊंमध्यमाभ्यांवषट् धंएंतंपंऐंअनामिकाभ्यांहुं धंओंपंपंऔंकनिष्ठिकाभ्यां
वौषट् धंअंयंरंलंवंशंषंसंहंलंक्षंअः करतलकरपृष्ठाभ्यांफट् इतिकरन्यासः ॐऐंह्रीं
श्रीं अंकंपंआंहृदयायनमः धंइंचंपंईंशिरसेस्वाहा धंउंटंपंऊंशिखायैवषट् धंएंतंपंऐंक
वचायहुं धंओंपंपंऔंनेत्रत्रयायवौषट् धंअंयंपंअः अस्त्रायफट् इतिषडंगविन्यासः श्वेत
मातृकान्यासंकुर्याद्यथा अंनमः आंनमः इंईंउंऊंऋंॠंऌंॡंएंऐंओंऔंअंअः कंठेषोडशदले
कंनमः खंगंघंङंचंछंजंझंञंटंठंनमः अनाहतेद्वादशदले डंनमः ढंणंतंथंदंधंनंपंफं
नमःनाभौदशदले बंनमःभंमंयंरंलंनमःस्वाधिष्ठानेषड्दले वंनमःशंषंसंनमःमूलाधा

रेचतर्दले हंनमः क्षंनमः भ्रूमध्ये द्विदले इत्यन्तर्मातृकान्यासः अथ बहिर्मातृकान्या
सः तत्र ऋष्यादिकमन्तर्मातृकावद्देवन्यासस्तु यथा अंनमः शिरसि आंनमः मुखवृत्ते
इंनमः दक्षनेत्रे ईंनमः वामे उंनमः दक्षकर्णे ऊंनमः वामे ऋंनमः दक्षनसि ॠंनमः वा
मायां लृंनमः दक्षगण्डे ॡंनमः वामे एंनमः ऊर्ध्वोष्ठे ऐंनमः अधरे ओंनमः ऊर्ध्वदन्तेषु औंनमः
अधोदन्तेषु अंनमः शिरसि अःनमः आस्ये कंनमः दक्षपाणिमूले खंनमः कूर्परे गंनमः
मणिबन्धे घंनमः अङ्गुलिमूले ङंनमः अङ्गुल्यग्रे चंनमः वामपाणिमूले छंनमः कूर्परे
जंनमः मणिबन्धे झंनमः अङ्गुलिमूले ञंनमः अङ्गुल्यग्रे टंनमः दक्षपादकच्छे ठंनमः
जानुनि डंनमः गुल्फे ढंनमः अङ्गुलिमूले णंनमः अङ्गुल्यग्रे तंनमः वामपादकच्छे थं
नमः जानुनि दंनमः गुल्फे धंनमः अङ्गुलिमूले नंनमः अङ्गुल्यग्रे पंनमः दक्षपार्श्वे फंनमः वा
मे बंनमः पृष्ठे भंनमः नाभौ मंनमः जठरे यं त्वगात्मनेनमः हृदये रं असृगात्मनेनमः दक्षां
से लं मांसात्मनेनमः ककुदि वं मेदसात्मनेनमः वामांसे शं अस्थ्यात्मनेनमः हृदादिद
क्षपाण्यन्तं षं मज्जात्मनेनमः हृदादिवामपाण्यन्तं सं शुक्रात्मनेनमः हृदादिदक्षपादान्तं

हंःप्राणात्मनेनमः हृदादिवामपादांतं लंजीवात्मनेनमः पादादिनाभ्यंतं लंःपरमात्मने २२

श्री नमः नाभ्यादिमूर्धांतं इतिविन्यस्य पंचाशद्वर्णरूपांचकपर्दशशिभूषणां शुद्धस्फ

२२ टिकसंकाशांशुद्धक्षौमविराजितां शुक्लारत्नस्फुरद्भूषांजपमालांकमंडलुं पुस्तकंवर

22 दानेचबिभ्रतींपरमेश्वरीं एवंध्यात्वामातृकां स्वशूलकरण्यादिन्यासंकुर्यात्तद्यथा अथत

त्वन्यासः ॐआत्मतत्त्वायनमः हृदयायनमः ॐविद्यातत्त्वायनमः शिरसेस्वाहा

ॐशिवतत्त्वायनमः शिखायैवषट् ॐगुरुतत्त्वायनमः कवचायहुं ॐशक्तितत्त्वाय

नमः नेत्रत्रयायवौषट् ॐशिवशक्तितत्त्वायनमः अस्त्रायफट् इतितत्त्वन्यासः अ

थमंत्रन्यासः ॐनमः शिरसि ह्रींनमः ललाटे श्रींनमः नेत्रयोः ह्रुंनमः कर्णयोः

फ्रांनमः नासाग्रे श्रांनमः मुखे प्रांनमः कंठे प्रांनमः वक्षसि रिंनमः भुजयोः कोंन

मः नाभौ यैंनमः लिंगे नंनमः जान्वनोः मः नमः पादयोः इतिसप्तधाव्यापयेत् इति

मंत्रन्यासः अथाष्टदेवीन्यासः अंआंइंईंकंखंगंघंङं अमायैनमः शिरसि उंऊंऋंॠं

चंछंजंझंञं कामायैनमः मुखे ऌंॡंएंऐंटंठंडंढंणं चार्वांग्यैनमः कंठे ओंऔंअंअः तंथं

देधंनंटेकथादिऐयेनमः वक्षसि अंआंइंईंपंफंबंभंमंताराये नमः नाभौ उंऊंऋंॠंयंरं
लंवंपार्वत्यैनमः लिंगे ऌंॡंएंऐंशंषंसंहंरुक्मिण्यैनमः जान्वोः ओंऔंअंअः लंक्षंशि
वायेनमः पादयोः इत्यष्टदेवीन्यासः अथायुधन्यासः वरायनमः दक्षाधःकरे खड्गा
यनमः दक्षे चक्रायनमः वामे अभयायनमः वामाधः इत्यायुधन्यासः ततः पुनः ष
डंगन्यासः संप्रदायेन ॐह्रांश्रांहृदयायनमः ॐह्रींश्रींशिरसेस्वाहा ॐह्रूंश्रूंशिखा
यैवषट् ॐह्रैंश्रैंकवचायहुं ॐह्रौंश्रौंनेत्रत्रयायवौषट् ॐह्रःश्रः अस्त्रायफट् इति न्या
सैर्देहंविन्यस्य मूलाधारेमूलविद्यांविद्युत्कोटिसमप्रभां सूर्यकोटिप्रतीकाशांचन्द्र
कोटिप्रभांप्रिये बिसतंतुस्वरूपांतांबिंदुत्रिवलयांप्रिये ऊर्ध्वशक्तिनिपातेनसहजे
नवराननेमूलशक्तिदृढत्वेनमध्यशक्तिप्रबोधतः परमानंदसंदोहमानंदोचितचे
तसा श्रीदेवींसूर्वोक्तप्रकारेणस्वपत्रकमलेध्यात्वा मानसोपचारैराराध्य नैवेद्या
वसरेतत्त्वेश्वदेवकथीयया मूलाधारे आत्मांतरात्मपरमात्मज्ञानात्मेत्यात्मचतुष्टये
नचतुरस्रेकुंडल्याग्निसमुज्वलेकुंडेध्यात्वा तत्रश्रीदेवींध्यात्वा तन्मुखेमूलांतेअहंतां

श्री
२२
23

जुहोमि स्वाहा इत्याद्यहंतां मम सत्यं पैशुन्यं कामं क्रोधं लोभं मोहं मदं मात्सर्यं जुहोमि स्वाहा
स्वषुम्नया स्त्रुङ्मुक्रमनः स्रुवेण प्रत्येकं हुत्वा अथवा धर्माधर्म हविर्दीप्ते स्वात्माग्नौ मन
सा स्त्रुचा सुषुम्नावर्त्मना नित्यमक्षवृत्तीर्जुहोम्यहं इति हुत्वा पुनः हृदयकमले देवीं
ध्यात्वा उपचारपोषणादि सर्वोपचारैराराध्य मूलं यथाशक्ति जपित्वा प्राणायामादि
ना जपं समर्प्य श्रीगुरुं प्रणम्य पीठन्यासं न्यासेन स्वदेहे कुर्यात् ॐ मण्डूकाय नमः काला
ग्निरुद्राय नमः मूलप्रकृत्यै नमः आधारशक्त्यै नमः कमठाय नमः अनन्ताय नमः पृथि
व्यै नमः सुधार्णवाय नमः रत्नद्वीपाय नमः कल्पवनाय नमः नन्दनोद्यानाय नमः चिं
तामणिमण्डपाय नमः मणिवेदिकायै नमः श्मशानाय नमः रत्नसिंहासनाय नमः
दिक्षु नानामुनिगणेभ्यो नमः नानादेवेभ्यो नमः धर्माय नमः दक्षांसे ज्ञानाय नमः वा
मांसे वैराग्याय नमः वामोरौ ऐश्वर्याय नमः दक्षोरौ अधर्माय नमः दक्षकुक्षौ अज्ञानाय न
मः दक्षपृष्ठे अवैराग्याय नमः वामपृष्ठे अनैश्वर्याय नमः वामकुक्षौ शेषाय नमः पद्मा
य नमः प्रकृतिमयपत्रेभ्यो नमः विकृतिमयकेसरेभ्यो नमः पंचाशद्बीजभूषितकर्णि २३

कायैनमः सूर्यमंडलायनमः सोममंडलायनमः वैश्वानरमंडलायनमः संसत्वायनमः
रंरजसेनमः तंतमसेनमः आंआत्मनेनमः अंअंतरात्मनेनमः पंपरमात्मनेनमः ह्रीं
ज्ञानात्मनेनमः पत्रेषु वामायैनमः ज्येष्ठायैनमः रौद्र्यैनमः अंबिकायैनमः इच्छायैन
मः ज्ञानायैनमः क्रियायैनमः कुब्जिकायैनमः चित्रायैनमः विषघ्निकायैनमः दूत्यै
नमः आनंदायैनमः मध्ये मनोन्मन्यैनमः ऐंपरायैनमः अपरायैनमः विरूपायैनमः
ह्सौंः सदाशिवमहाप्रेतपद्मासनायनमः इतिपीठंविन्यस्य तत्रैवहृदयेस्वाभेदेनश्रीशा
रिकाभगवतींध्यायेत् बालार्ककोटिद्युतिमिंदुचूडांवरासिचक्राभयबाहुमाद्यां सिं
हाधिरूढांशिववामदेवलीनांभजेचेतसिशारिकेशीं इतिशारिकांविचिंत्य बध्नामि
केकरणेतेबद्धमतिर्भवभवोच्छित्यै प्राणापानौचक्षुःश्रोत्रेघ्राणमनांसिसुखंचिरंति
ष्ठंतुस्वाहा मानसोपचारैराराध्य मनसायथाशक्तिजपहोमादिकंविधाय कामक
लारूपंस्वात्मानंविचिंत्य स्वदेहंगंधादिभिरलंकृत्य कलशस्थापनंकुर्यात् स्वदक्षे
त्रिकोणंहृत्नबिंबमंडलंभूमौविरचय्य तत्राधारशक्तयेनमः इतिसंपूज्य तत्राधारं

श्री
२४
24

निधाय तदुपरि अस्त्रायफट् इतिमंत्रेणशोधितं नमः इतिश्रवितं पात्रंशंखंवा सं
स्थाप्य तत्रगंगेगेइत्यादितीर्थमावाह्य ॐमितिगंधादीन्निक्षिप्य वह्निसूर्यसोमकला
भ्योनमः इतिसंपूज्य धेनुमुद्रांप्रदर्श्यास्त्रमंत्रेणसंपूजयेत् इतिसामान्यार्घ्यंविधा
य स्ववामभागेषट्कोणांतर्गतत्रिकोणवृत्तयविंदुवाराः हृन्मचतुरस्रंविधाय सा
मान्यार्घ्योदकेन तन्मंडलमभ्युक्ष्य तत्राधारशक्तिभ्योनमः इत्याधारशक्तीःसम्पू
ज्य तत्राधारंप्रक्षाल्य मंडलोपरिसंस्थाप्य रंवह्निमंडलायदशकलात्मनेनमः
इतिसंपूज्य फडितिकलशंप्रक्षाल्य करेणनपश्यं रक्तवस्त्रमाल्यादिनासंभूष्य
देवीबुद्ध्यासंस्थाप्य अंअर्कमंडलायद्वादशकलात्मनेनमः इतिकलशंसंपूज्य
ॐसोममंडलायषोडशकलात्मनेनमः इतिद्रव्यंसंपूज्य फडितिसंरक्ष्य हुमित्य
वगुंठ्य मूलेनसंवीक्ष्य नमइत्यभ्युक्ष्य मूलेनगंधमाघ्राय कुंभेधेनुमुद्रांदत्वा शाप
मोचनंकुर्यात् एकमेवपरंब्रह्मस्थूलसूक्ष्ममयंध्रुवं कचोद्भवांब्रह्महत्यांतेनते
नाशयाम्यहं सूर्यमंडलसंभूते वरुणालयसंभवे अमावीजमयेदेविशुक्रशापा

ह्रिमुच्यतां वेदानां प्रणवो बीजं ब्रह्मानंदमयो यदि तेन सत्येन हे देवि ब्रह्महत्यां व्य
पोहतु इति त्रिः ततः वां वीं वूं वैं वौं वः ब्रह्मशापविमोचितायै सुरादेव्यै नमः इत्य
पि त्रिः ॐ ह्रीं श्रीं क्रां क्रीं क्रूं क्रैं क्रौं क्रः सुराकृष्णशापं मोचय २ अमृतं स्रावय २ स्वा
हा इति त्रिः हंसः शुचिषद्वसुरंतरिक्षसद्धोता वेदिषदतिथिर्दुरोणसत् नृषद्वरसदृ
तसद्व्योमसदब्जा गोजा ऋतजा अद्रिजा ऋतं इत्यपि त्रिः आनंदभैरवं अष्टादशभुजं त्रिन
यनं पंचमुखं सुरादेवीसहितं ध्यात्वा हसक्षमलवरयूं आनंदभैरवाय वौषट् सह
क्षमलवरयीं सुरादेव्यै वौषट् इति देवद्वयं त्रिः संपूज्य द्रव्यमध्ये दक्षिणावर्तेन त्रिः
पंक्त्या अ १६ क १६ थ १६ इति शाक्तिचक्रं विलिख्य तन्मध्ये हं तेच तेन द्रव्यमध्ये ऽ
मृतं विचिंत्य धेनुमुद्रयामृतीकृत्य वमिति सुधाबीजं मूलमप्यष्टधा वदेष्ट्वा पठि
त्वा आत्मश्रीचक्रयोर्मध्ये त्रिकोणषट्कोणवृत्तचतुरस्रं विलिख्य चतुरस्रे पूर्णगि
रिपीठाय नमः उड्डियानपीठाय नमः कामरूपपीठाय नमः जालंधरपीठाय न
मः इति संपूज्य षट्कोणे षडंगं संपूज्य त्रिखंडेन त्रिकोणाग्रदक्षोत्तरं संपूज्य मध्ये आ

श्री धारप्रान्त्यैनमः इतिसंपूज्य त्रिकोणगर्भेयंत्रिकांसंस्थाप्य नमइतिसामान्यार्घ्यजलेनाभ्युक्ष्य २५
२५ यंधूम्रार्चिषेनमः रंउष्मायैनमः लंज्वलिन्यैनमः वंज्वालिन्यैनमः शंविस्फुलिंगिन्यैनमः
षंसुश्रियैनमः संसुरूपायैनमः हंकपिलायैनमः लंहव्यवाहायैनमः क्षंः कव्यवाहायैनमः
25 इतिसंपूज्य मध्ये रंवह्निमंडलायदशकलात्मनेनमः इतिसंपूज्य षट्कोणेषडंगंचसं
पूज्य मध्येमूलेनदेवींसंपूज्य पात्रेफडितिप्रक्षाल्य यंत्रिकोपरिसंस्थाप्य तत्र कंभंत
पिन्यैनमः खंबंतापिन्यैनमः गंफंधूम्रायैनमः घंपंमरीच्यैनमः ङंनंज्वलिन्यैनमः चं
धंरुच्यैनमः छंदंसुप्रभायैनमः जंथंभोगदायैनमः झंतंविश्वायैनमः ञंणंबोधिन्यैन
मः टंढंधारिण्यैनमः ठंडंक्षमायैनमः इति अंअर्कमंडलायद्वादशकलात्मनेनमः
इतिसंपूज्य त्रिकोणवृत्तषट्कोणंपात्रेविलिख्य समस्तव्यस्तमंत्रेणसंपूज्य वरुणबी
जंमूलंविलोममातृकांचपठन्नमृतेनत्रिकोणंप्रपूर्य जलेनचभागमेकंप्रपूर्य तत्र
स्वर्गांशादिनिक्षिप्य अंअमृतायैनमः आंआनंदायैनमः इंपूषायैनमः ईंतुष्ट्यैनमः
उंपुष्ट्यैनमः ऊंरत्यैनमः ऋंधृत्यैनमः ॠंशशिन्यैनमः लृंचंद्रिकायैनमः लॄंकांत्यैनमः

ऐं ज्योत्स्नायै नमः ऐं श्रियै नमः ॐ प्रीत्यै नमः ॐ अंगदायै नमः अं पूर्णायै नमः अः पूर्णा
मृतायै नमः इति ॐ षोडशकलात्मने सोममण्डलाय नमः इति संपूज्य पूर्ववद्यन्त्रं द्रव्ये
विलिख्य त्रिकोणं त्रिरेखायां अं १६ कं १६ थं १६ इति त्रिविलिख्य मूले खण्डत्रयेण त्रि
कोणं संपूज्य षट्कोणे षडंगं च गंगेत्यादितीर्थमावाह्य आनन्दभैरवभैरव्योर्मन्त्रेण
संपूज्य पूर्वादितः स्लूं गगनरत्नेभ्यो नमः पूर्वे स्लूं स्वर्गरत्नेभ्यो नमः दक्षिणे स्लूं मर्त्यर
त्नेभ्यो नमः पश्चिमे स्लूं पातालरत्नेभ्यो नमः उत्तरे स्लूं नागरत्नेभ्यो नमः मध्ये इति संपूज्य
मांसादिसंशोधयेत् यथा तत्र मांसादिपात्रमानीय अस्त्राय फडिति सामान्यार्घोदकेना
भ्युक्ष्य हूमित्यवगुण्ठ्य वमित्यमृतमुद्रयामृतीकृत्य तालत्रयेण दिशः संबध्य तदुपरि मूले
नसप्तधाभिजप्य प्रतद्विष्णुस्तवते वीर्येण मृगो न भीमः कुचरो गिरिष्ठः यस्योरुषु त्रिषु विक्रम
णेष्वधिक्षियन्ति भुवनानि विश्वा इति त्रिः इति मांसशोधनं त्र्यम्बकं यजामहे सुगन्धिं पुष्टिव
र्धनं उर्वारुकमिव बन्धनान्मृत्योर्मुक्षीय मामृतात् इति मीनशोधनं तद्विष्णोः परमं पदं सदा
पश्यन्ति सूरयः दिवीव चक्षुराततं तद्विप्रासो विपन्यवो जागृवांसः समिन्धते विष्णोर्यत्प

श्री
२९
26

रमेयदं इतिमुद्राशोधनं विष्णुर्योनिं कल्पयतु त्वष्टा रूपाणि विंशतु आसिंचतु प्रजापति
र्धाता गर्भं दधातु ते गर्भं देहि सिनीवाली गर्भं देहि सरस्वति गर्भं दे त्वश्विनौ देवावादत्तं पु
ष्करस्रजे ॐ ऐं ह्स्रूं: फ्रैं ज्वं सः अमृते ऽमृतोद्भवे ऽमृतवर्षिणि अमृतं स्रावय २ स्वाहा इति
कुंडगोलादिकं संशोध्य अवगुंठ्य अमृतमुद्रयाऽमृतीकृत्य तदुपरि समस्तथा मूलेन संपूज्य
तत्र देवीमावाह्य तालत्रयदिग्बंधं विधाय अवगुंठ्याऽमृतीकृत्य योनिं प्रदर्श्य ह्स्रौः नमः
इति संपूज्य शेषमुद्रां प्रदर्श्य षडंगेन सकलीकृत्य मत्स्यमुद्रया पात्रमाच्छाद्य मूलेन दश
धा जप्त्वा पात्रे देवीरूपं विभावयेत् इति ततो देव्याज्ञामादाय ग्रहसमीपे गुरुपात्रे ततः श
क्तिपात्रे भोगपात्रे स्वपात्रे योगिनीपात्रे वीरपात्रे बलिपात्रे पाद्यपात्रे अर्घ्यपात्रे आच
मनीयपात्रे मधुपर्कपात्रे संस्थाप्य चर्वणयुतकारणेन तत्वमुद्रया श्रीपात्रादिन्दुं समुद्धृत्य
आनंदभैरवं तर्पयामि नमः इति तन्मंत्रेण त्रिः संतर्प्य ततः गुरुं श्रीमच्छ्री अमुकानंदनाथ
श्रीपादुकां तर्पयामि नमः इति त्रिः संतर्प्य एवं परमगुरुपरमाचार्यादीन् संतर्प्य श्रीपात्रामृ
तेन मूलेन देवीं सायुधां सवाहनां सपरिकरां तर्पयामि नमः इति संतर्पयेत् इति कलशामृ

जाविधिः अथ पीठोपरि पूर्ववत् पीठन्यासक्रमेण पीठपूजां कृत्वा तत्र श्रीचक्रे संस्था
प्य श्रीशारिकाभगवतीं ध्यात्वा वायुबीजेन वामनासापुटेन स्वहृदयात् कुसुमांजलि
मानीय तत्रावाह्य देवेशि भक्तसुलभे परिवारसमन्विते यावत्त्वां पूजयिष्यामि तावद्देवि
इहावह इति पठित्वा मूलं श्रीवामदेवसहिते श्रीशारिकाभगवति इहागच्छ २ इह ति
ष्ठ २ इह सन्निधेहि २ इह सन्निरुद्धस्व मम सर्वोपचारसहितां पूजां गृहाण २ इत्यावाहनादि
मुद्राः प्रदर्श्य प्राणप्रतिष्ठां श्रीचक्रे लेलिहानमुद्रया पूर्ववद्विधाय दशदिग्बंधं कृत्वाः
वगुंठ्य सकलीकृत्य परमीकृत्य धेनुयोनी प्रदर्श्य वरासिचक्राभयमुद्राः प्रदर्श्य श्री
पात्रामृतेन साङ्गां सवाहनां सपरिकरां सावरणां श्रीवामदेवभैरवसहितां श्रीशारिका
भगवतीं तर्पयामि नमः इति त्रिः संतर्प्य पुनरपि मूलेन श्रीशारिकाभगवतीश्रीपादु
कां तर्पयामि नमः इति त्रिः संतर्प्य मूलमुच्चार्य एतत्पाद्यं श्रीवामदेवसहितश्रीशारि
काभगवत्यै नमः इति पादयोः पाद्यं एवमर्घ्यं स्वाहा शिरसि आचमनीयं मधुपर्कं च
स्वधा मुखे स्नानीयं नमः सर्वांगे पादुके परिधाय स्वशारिके रत्ननिर्मिते स्नानमंडप

श्री
२१

मायाहिरण्मनार्घ्यशाक्रदिग्गते मूलेनस्वस्नाप्य पुनःपुनःपाटुकेपरिधायस्वशारिके र
त्ननिर्मिते आगच्छनिर्मितेरम्यमलंकारस्यमंडपं शुद्धशुक्लेनांगंप्रोंच्छ्य विचित्रपट
वस्त्रकुंकुमकस्तूरीचंदनसिंदूरमुकुटकुंडलहारनूपुरादिनानालंकारान्दत्वा पुनराच
मनीयंदद्यात् ततोमध्यानामांगुष्ठाभ्यांगंधोनमः इतिगंधं अंगुष्ठतर्जनीभ्यांपुष्पाणिवौषट्
इतिपुष्पैःसंपूज्य धूपपात्रेफडितिसंपूज्य पुरतःस्थापयित्वा वामतर्जन्यासंस्पृशन् श्री
पात्राम्रतेनधूपंनिवेदयामीतिनिवेद्य ॐजगद्धुनिमंत्रमातःस्वाहा इतिघंटांसंपूज्य
वामेनपाणिनातांवादयन् मध्यानामांगुष्ठैर्धूपंधृत्वा गायत्रीमूलमंत्रेचपठन् वनस्प
तिरसोत्पन्नोगंधाढ्योगंधउत्तमः आघ्रेयःसर्वदेवानांधूपोयंप्रतिगृह्यतां इतित्रिधोत्ता
ल्यदेवींधूपयेत् ततोदीपंसम्मुखेसंस्थाप्य पूर्ववत्प्रोक्षणपूजनेकृत्वा वाममध्यम
यादीपपात्रंस्पृशन् दीपंनिवेदयामीतिनिवेद्य पूर्ववद्घंटांवादयन् मध्यानामामध्ये
दीपपात्रमंगुष्ठेनधृत्वादर्शयन् गायत्रीमूलेचपठन् सुप्रकाशोमहादीपःसर्वत्रतिमि
रापहः सबाह्याभ्यंतरंज्योतिर्दीपोयंप्रतिगृह्यतां इतिदीपयेत् ततःस्वर्णादिपात्रेकुं

क्रमेणवस्त्रयुग्मंचेन्द्ररूपंकृत्वा मध्येदीपमेकमष्टपत्रेषुदीपाष्टकंसंस्थाप्य श्रींसौः ल्रूं
श्रूँ ल्रैंस्रूंल्रूंश्रीरत्नेश्वर्यैनमः इत्यभ्यर्च्य मूलेनचाभ्यर्च्य स्थालकंमस्तकांतमुद्धृत्य नव
वारंमूले समस्तचक्रचक्रेशीयुतेदेविनवात्मके आरात्रिकमिदंदेविगृहाणममसिद्धये
इतिचक्रमुद्रयानीराजयेत् ततोनानानैवेद्यंस्वर्णादिपात्रेनिक्षिप्य हूमित्यवगुंठ्य धेनु
मुद्रयामृतीकृत्य मूलेसप्तधाजप्त्वा वामांगुष्ठेननैवेद्यपात्रंस्पृशन् मूलांते हेमपात्रग
तेदिव्यंपरमान्नेनसंस्कृते पंचधाषड्रसोपेतंगृहाणपरमेश्वरि नैवेद्यंनिवेदयामीति
दत्त्वानामांगुष्ठाभ्यामुत्सृजेत् ततःपुनराचमनीयंदत्त्वा मूलांतेकर्पूरादियुक्तंताम्बूलं
निवेदयामीतिपूर्ववद्दद्यात् सर्वेषामर्घ्यपात्रजलेनोत्सर्गःकार्यः ततस्तत्तन्मुद्रयादेवीं
त्रिःसंतर्प्य पूर्वोक्तमुद्राःप्रदर्श्य योनिंहृदिक्षोभिणींमुखे द्राविणींभ्रूमध्ये आकर्षिणीं
ललाटे वशिनींब्रह्मरंध्रे आह्लादिनींपंचमुद्रामयींप्रदर्श्य कृतांजलिः श्रीशारिकाभग
वतिआवरणंतेपूजयामीत्याज्ञांगृहीत्वा आवरणपूजामारभेत् तत्रादौचतुर्द्वारपूजां
कुर्यात् ॐह्रींश्रींगंगणपतिश्रीपादुकांपूजयामिनमस्तर्पयामिनमः ॐह्रींश्रींधं

श्री
२८
28

धर्मराजश्रीपादुकांपूजयामिनमस्तर्पयामिनमः ॐह्रींश्रींवरुणश्रीपादुकांपूजयामि
नमस्तर्पयामिनमः ॐह्रींश्रींकुबेरश्रीपादुकांपूजयामिनमस्तर्पयामिनमः इतिच
तुर्द्वारप्रथमरेखायां पूर्वादिक्रमेणपूजयेदितिप्रथमावरणं ततोद्वितीयरेखायां इन्द्रा
दीन्पूजयेद्यथा ॐह्रींश्रींइन्द्रश्रीपादुकांपूजयामिनमस्तर्पयामिनमः ॐअग्निश्रीपादु
कांपूजयामिनमस्तर्पयामिनमः ॐयमश्रीपादुकांपूजयामिनमस्तर्पयामिनमः ॐ
निर्ऋतिश्रीपादुकांपूजयामिनमस्तर्पयामिनमः ॐवरुणश्रीपादुकांपूजयामिनम
स्तर्पयामिनमः ॐवायुश्रीपादुकांपूजयामिनमस्तर्पयामिनमः ॐकुबेरश्रीपादुकां
पूजयामिनमस्तर्पयामिनमः ॐईशानश्रीपादुकांपूजयामिनमस्तर्पयामिनमः इन्द्रे
शानयोर्मध्ये ॐब्रह्मश्रीपादुकांपूजयामिनमस्तर्पयामिनमः निर्ऋतिवरुणयोर्मध्ये
ॐविष्णुश्रीपादुकांपूजयामिनमस्तर्पयामिनमः इतिचतुरस्रद्वितीयरेखायांसम्पूज्य
तृतीयरेखायामेतेषामायुधानिपूजयेद्यथा ॐवज्रश्रीपादुकांपूजयामिनमस्तर्पयामि
नमः ॐशक्तिश्रीपादुकांपूजयामिनमस्तर्पयामिनमः ॐदण्डश्रीपादुकांपूजयामिन

मस्तर्पयामि नमः ॐ खड्गश्रीपादुकां पूजयामि नमस्तर्पयामि नमः ॐ पाशश्रीपादुकां
पूजयामि नमस्तर्पयामि नमः ॐ पद्मश्रीपादुकां पूजयामि नमस्तर्पयामि नमः ॐ चक्र
श्रीपादुकां पूजयामि नमस्तर्पयामि नमः ॐ ध्वजश्रीपादुकां पूजयामि नमस्तर्पयामि न
मः ॐ गदाश्रीपादुकां पूजयामि नमस्तर्पयामि नमः ॐ त्रिशूलश्रीपादुकां पूजयामि न
मस्तर्पयामि नमः इति तृतीयरेखायां संपूज्य इति द्वितीयावरणं अथ त्रिहत्तपूजा
तत्रादौ प्रथमरेखायां मूले ॐ ऐं दिव्यौघपराख्यगुरुपंक्तिश्रीपादुकां पूजयामि नम
स्तर्पयामि नमः द्वितीयरेखायां मूले ऐं सिद्धौघपरापराख्यगुरुपंक्तिश्रीपादुकां
पूजयामि नमस्तर्पयामि नमः तृतीयरेखायां मूले ऐं मानवौघाऽपराख्यगुरुपंक्ति
श्रीपादुकां पूजयामि नमस्तर्पयामि नमः अत्रैव ॐ स्वगुरुश्रीपादुकां पूजयामि नम
स्तर्पयामि नमः ॐ परमगुरुश्रीपादुकां पूजयामि नमस्तर्पयामि नमः ॐ परमाचार्य
गुरुश्रीपादुकां पूजयामि नमस्तर्पयामि नमः ॐ परमेष्टिगुरुश्रीपादुकां पूजयामि नम
स्तर्पयामि नमः इति तृतीयरेखायां तृतीयावरणं ततोऽष्टदलेषु मूलेन पुष्पांजलिं

श्री २९ 29

दत्वा अष्टमातृकाः पूजयेद्यथा स्वाग्रदलमारभ्य वामावर्तेन ॐ ब्राह्मीश्रीपादुकां पूजया
मि नमस्तर्पयामि नमः ॐ वैष्णवीश्रीपादुकां पूजयामि नमस्तर्पयामि नमः ॐ चंडिकाश्री
पादुकां पूजयामि नमस्तर्पयामि नमः ॐ अपराजिताश्रीपादुकां पूजयामि नमस्तर्पयामि न
मः ॐ कौमारीश्रीपादुकां पूजयामि नमस्तर्पयामि नमः ॐ शांभवीश्रीपादुकां पूजयामि
नमस्तर्पयामि नमः ॐ वाराहीश्रीपादुकां पूजयामि नमस्तर्पयामि नमः ॐ नारसिंहीश्री
पादुकां पूजयामि नमस्तर्पयामि नमः इति संपूज्य संतर्प्य ऽष्टदलकेसरेषु दक्षावर्तेनाष्ट
भैरवान्पूजयेत् ॐ असितांगभैरवश्रीपादुकां पूजयामि नमस्तर्पयामि नमः ॐ रुरुभैर
वश्रीपादुकां पूजयामि नमस्तर्पयामि नमः ॐ चंडभैरवश्रीपादुकां पूजयामि नमस्तर्पया
मि नमः ॐ क्रोधभैरवश्रीपादुकां पूजयामि नमस्तर्पयामि नमः ॐ उन्मत्तभैरवश्रीपा
दुकां पूजयामि नमस्तर्पयामि नमः ॐ कपालभैरवश्रीपादुकां पूजयामि नमस्तर्पया
मि नमः ॐ भीषणभैरवश्रीपादुकां पूजयामि नमस्तर्पयामि नमः ॐ संहारभैरवश्रीपा
दुकां पूजयामि नमस्तर्पयामि नमः इति चतुर्थावरणं अथाष्टकोणपूजा तत्रादौ मूलेन

पूजां पुष्पांजलिं दत्वा ह्रँ श्यामा श्रीपादुकां पूजयामि नमस्तर्पयामि नमः ह्रँ कामा श्रीपा
दुकां पूजयामि नमस्तर्पयामि नमः ह्रँ चार्वांगी श्रीपादुकां पूजयामि नमस्तर्पयामि नमः
ह्रूँ टंकधारिणी श्रीपादुकां पूजयामि नमस्तर्पयामि नमः ह्रँ तारा श्रीपादुकां पूजयामि नम
स्तर्पयामि नमः ह्रँ पार्वती श्रीपादुकां पूजयामि नमस्तर्पयामि नमः ह्रँ रुक्मिणी श्रीपादु
कां पूजयामि नमस्तर्पयामि नमः ह्रँ शिवा श्रीपादुकां पूजयामि नमस्तर्पयामि नमः इति
वसुकोणेषु तत्र त्रिकोणे प्रथमकोणमारभ्य ॐ ह्रीं श्रीं कालिका श्रीपादुकां पूजयामि नमस्त
र्पयामि नमः ईशाने ह्रँ त्रिपुरसुंदरी श्रीपादुकां पूजयामि नमस्तर्पयामि नमः आग्नेये ह्रँ दु
र्गा श्रीपादुकां पूजयामि नमस्तर्पयामि नमः इति त्रिकोणपूजा षष्ठावरणं ततो बिंदौ मू
लेन पुष्पांजलिं दत्वा तत्र श्रीदेवीं ध्यात्वा पुष्पांजलिं गृहीत्वा मूलेसमधोस्यार्य श्रीम
च्छ्रीवामदेवसहितां सपरिवारां सायुधां सवाहनां श्रीशारिका भगवती श्रीपादुकां पूज
यामि नमस्तर्पयामि नमः इति संपूज्य संतर्प्य पुनः पूर्ववद् गंधादिना संपूज्य संतर्प्य नि
त्यहोममाचरेत् यथा अग्नौ जले वा चक्रं विलिख्य विभाव्य वा प्राणाय स्वाहा अपानाय स्वा

श्री
३० हा व्यानायस्वाहा उदानायस्वाहा समानायस्वाहा इतिहुत्वा षडंगाहुतीकुर्याद्यथा
३० ॐ ह्रांश्रांहृदयायनमःस्वाहा ॐह्रींश्रींशिरसेस्वाहास्वाहा ॐह्रूंश्रूंशिखायैवषट्स्वाहा
ॐह्रैंश्रैंकवचायहुंस्वाहा ॐह्रौंश्रौंनेत्रत्रयायवौषट्स्वाहा ॐह्रःश्रःअस्त्रायफट्स्वाहा
इतिषडंगाहुतीर्हुत्वा मूलेनस्वदेव्येहुत्वा स्वहृदिविसृज्य ईशानेमंडलंकृत्वा वटुका
यनमः एह्येहिदेवीपुत्रवटुकनाथकपिलजटाभारभास्वरत्रिनेत्रज्वालामुखसर्वविघ्ना
न्नाशय२ सर्वोपचारसहितंबलिंगृह्णगृ२स्वाहा आग्नेय्यांयोगिनीभ्योनमः ऊर्ध्वंब्रह्मा
ण्डतोवादिविगगनतलेभूतलेनिस्तलेवा पातालेवानलेवासलिलपवनयोर्यत्रकुत्रस्थि
तावा क्षेत्रेपीठोपपीठादिषुचकृतपदाधूपदीपादिकेन प्रीतादेव्यःसदानःशुभव
लिविधिनापांतवीरेंद्रवंद्याः यांयोगिनीभ्यःस्वाहा सर्वयोगिनीहुंफट्स्वाहा इतियो
गिनीबलिः नैरृत्ये क्षांक्षींक्षूंक्षैंक्षौंक्षः क्षेत्रपालअलिबलिसहितंबलिंगृह्णगृ२स्वाहा
इतिक्षेत्रपालबलिः वायव्ये गांगींगणपतयेवरवरदसर्वजनंमेवशमानय२बलिं
गृह्णगृ२स्वाहा इतिगणपतिबलिः उत्तरे सर्वभूतेभ्योनमः ॐह्रींसर्वविघ्नकृद्भ्यःसर्वभू

तेभ्यो पत्नीसहितेभ्यो हुं फट् स्वाहा सर्वभूतेभ्य एष बलिर्नमः इति सर्वाङ्गुलिभिः बलिमुत्सृ
जेदिति भूतबलिः अशक्त एकपात्रे एव बलिपंचकं दद्यात् अस्मिन्नेवावसरे छागादिब
लिं दद्यात् तत्र पशुं मूलेन संस्थाप्य गंधाक्षतादिभिरलंकृत्य देव्यग्रे संस्थाप्य मूलेन
प्रोक्षणीजलेन प्रोक्ष्य अस्त्रेण संरक्ष्य कवचेनावगुंठ्य मूलेन धेनुमुद्रयामृतीकृत्य ॐ
सर्वदेवतारूपिणे बलिरूपायामुकपशवे नमः इति गंधादिना त्रिः संपूज्य तस्य दक्ष
कर्णे पशुपाशाय विद्महे विप्रकर्णाय धीमहि तन्नो जीवः प्रचोदयात् इति पशुगायत्रीं त्रिः
पठित्वा पुरतः खड्गं निधाय ॐ ह्रीं कालिकालिवज्रेश्वरि लोहदंडायै नमः इति गंधादि
ना त्रिरभ्यर्च्य तस्य मुष्टौ ॐ वागीश्वरीब्रह्मभ्यां नमः मध्ये ॐ लक्ष्मीनारायणाभ्यां नमः
अग्रे उमामहेश्वराभ्यां नमः इति संपूज्य तं खड्गं धृत्वा मंत्रयेत् खड्गाय खरनाशाय
देवकार्यार्थतत्परः पशुश्छेद्यस्त्वया शीघ्रं खड्गनाथ नमोस्तु ते इत्यभिमंत्र्य गंधाक्षत
जलादिकमादाय ॐ मूलं अद्यामुकमासे तिथ्यादि अमुकगोत्रोऽमुकशर्माऽमुककामः
श्रीशारिकाभगवति इमं पशुं तुभ्यमर्पयाम्यहं संप्रसीद इति पठित्वा पशोः शिरसि नि

श्री ३१

द्विप्य तच्छिरो धृत्वा यज्ञार्थं पशवः सृष्टा यज्ञार्थं पशुघातनं अतस्त्वां घातयिष्यामस्त
स्मात् यज्ञे वधोऽवधः शिवायन्नमिदं पिंडमतस्त्वे शिवतां गतः उद्बुध्यस्व पशो त्वं हि नाशि
वस्त्वं शिवोऽसि हि इति संबोधयित्वा खड्गमादाय सौः अस्त्राय फट् छिंदि छिंदि स्वाहा
इति खड्गं तस्य स्कंदे योजयेत् ततः स्वयं देवी रूपो भूत्वा निर्विकल्प एकेन प्रहारेण छिं
द्यात् सविकल्पः परहस्तेन छेदयेत् अत्रैव ब्राह्मणातिरिक्तः स्वास्त्रादि बलिं दद्यात् इति
बलिं दत्वाऽस्त्रे देव्यै दत्वा वटुकादिष्वपि दत्वा श्रीदेवीं सुप्रसन्नां विभाव्य पशुशिरो देव्याऽ
ग्रे संस्थाप्य तस्मिन् घृतकृत दशां प्रज्वलंतीं संस्थाप्य तत्र देवीं ध्यात्वा सुप्रसन्नां विभाव
येदिति बलिदानविधिः ततः प्राणायाम ऋष्यादि करषडंगन्यासानंतरं गुरुं देवीं ध्या
यन् फ्रां ॐ श्रीं हुं ग्रों शों शारिकायै नमः ह्रीं इत्युत्कीलनं ३ हूं ॐ श्रीं फ्रां ग्रों शों शारिकायै
नमः ह्रीं इति संजीवनं ३ घोम्लं षं सं हं लें नः इति तोटिल्यं ३ ॐ फ्रां देवि शारिके ब्रह्म
शापं मोचय २ स्वाहा इति शापहरीं दशधा जपेत् ॐ ह्रीं श्रीं हूं ग्रों शों शारिकायै नमः फ्रां
इति संपुटमंत्रः ॐ वं वामदेवं जपेत् १० माले माले महामाये सर्वशक्तिस्वरूपिणि चतुर्व

गीस्त्वयिन्यस्तस्तस्मान्मेसिद्धिभव इतिपठन्मालांवामहस्तेकृत्वा सामान्यार्घोदकेनाभ्युक्ष्य
मूलेनसंपूज्य शिरसिगुरुंहृदयेदेवींकंठेपीतवर्णांमूलविद्यांध्यायन् दक्षहस्तेनमालां
गृहीत्वा यथाशक्तिंजपंकुर्यात् ततः त्वंमालेसर्वदेवानांप्रीतिदाशुभदाभव शुभंकुरुष्व
मेभद्रेयशोवीर्यंचसर्वदा इतिपठन्मालांशिरसिधृत्वा पुनरपिप्राणायामंकृत्वाऋष्यादिक
रषडंगन्यासानन्तरं सामान्यार्घोदकेनचुलकंगृहीत्वा गुह्यातिगुह्यगोप्त्रीत्वंगृहाण
स्मत्कृतंजपं सिद्धिर्भवतुमेदेवित्वत्प्रसादान्महेश्वरि इत्यनेनतेजोमयंजपफलंदेवीवा
महस्तेसमर्प्य मालांमूलेनसंपूज्य स्वस्थानेसंस्थाप्य कवचसहस्रनामस्तवराजपाठंवि
धायाष्टांगंप्रणिपत्य सर्वमंगलमंगल्येशिवेसर्वार्थसाधके शरण्येत्र्यम्बकेगौरिनाराय
णिनमोस्तुते, इतिसप्तवारं पठन्सप्तधादेवींपुष्पैःपूजयेत् पुनःपुनर्नत्वा प्रदक्षिणीकृत्य देवनाथगुरोःस्वा
मिंदेशिकस्वात्मनायक त्राहित्राहिकृपासिन्धोपूजांपूर्णतरांकुरु सामयिकैःसहमं
डलेवंदनंकुर्याद्यथा तत्रादौगुरुपात्रमुद्धृत्य गुरुमंत्रंस्मरन् यदिगुरुस्तत्रैवस्यात्तस्मै द
द्यात् यदिनस्यात्तज्ज्येष्ठशिष्यायदद्यात् तदभावेस्वशिरसिस्थापयेत् ततःस्वपात्रंगृही

श्री
३२
32

त्वा कुंडलिनीं स्वजिह्वाग्रमानीय सामयिकेभ्यो जुहोमीत्युक्त्वा तेभ्यो जुषस्व जुषतां य
थोचितां तां गृहीत्वा पात्रवन्दनं कुर्याद्यथा श्रीमद्भैरवशेखरप्रविलसच्चन्द्रामृताप्लावि
तं देवाधीश्वरयोगिनीगणमहासिद्धैः समाराधितं आनंदागमकं महात्मकमिदं साक्षा
त्त्रिखंडामृतं वंदे श्रीप्रथमं करांबुगतं पात्रं विशुद्धिप्रदं १ इदं पवित्रममृतं पिबामि भवभे
षजं पशुपाशसमुच्छेदकारणं भैरवोदितं आं ईं ज्वलति ज्योतिरहमस्मि ज्योतिर्ज्वलति
ब्रह्माहमस्मि अहमस्मि ब्रह्माहमस्मि योहमस्मि ब्रह्माहमस्मि सोहमस्मि ब्रह्माहमस्मि अ
हमेवाहं मां जुहोमि स्वाहा इत्युक्त्वा प्रथमं पात्रं कुंडलिनीमुखे जुहुयात् आत्मतत्त्वं शो
धयामि स्वाहा हैमे सिन्धुरसावहं दयितया दत्तं चपेयादिभिः किंचिच्चंचलरक्तपंकजदृ
ग्गासानंदमहीदितं वामेस्वांडविशुद्धिशकलं पाणौ विधायास्वके वंदे पात्रमहं
द्वितीयमधुनानंदैकसंवर्धने अन्यैर्मंत्ररपि २ विद्यातत्त्वं शोधयामि स्वाहा सर्वाम्नाय
कलाकलापकलितं कौतूहलोद्योतनं चंद्रोपेंद्रमहेंद्रशंभुवरुणब्रह्मादिभिः सेवितं
ध्यातं देवगणैः परं मुनिगणैर्मोक्षार्थिभिः सर्वदा वंदे पात्रमहं तृतीयमधुनास्वात्माव

बोधक्षमं ३ शिवतत्त्वं शोधयामि स्वाहा मद्यं मीनरसावहे हरिहरब्रह्मादिभिः पूजितं
मुद्रामैथुनधर्मकर्मनिरतं तारास्फूर्तिक्रमाः ऽऽ अयं आचार्याष्टकसिद्धभैरवकलाधीशेन
संशोधितं पायात् पंचमकारतत्त्वसहितं पात्रं चतुर्थं नमः भैरवतत्त्वं शोधयामि स्वाहा
४ आधारे भुजगाधिराजवलये पात्रं महीमंडले द्रव्यं सप्तसमुद्रवारि पिशितं चाष्टौ च दि
ग्दंतिनः सोहं भैरवमर्चयन् प्रतिदिनं तारागणै रक्षितै रादित्यप्रमुखैः सुरासुरगणै राज्ञा
करैः किंकरैः विद्यातत्त्वं शोधयामि स्वाहा ५ छत्रं चामरभद्रपीठपरमानंदोदयादाय
के वाजी दंतिमनोहरं सुखकरं सायुज्यसाम्राज्यदं नानाव्याधिभवांधकारहरणं जन्मां
तरध्वंसनं श्रीमद्भैरवभैरवीप्रियतरं पात्रं च षष्ठं नमः इति कुलतत्त्वं शोधयामि स्वाहा ६
जाग्रत्स्वप्नसुषुप्तिबोधपवनं चैतन्यसाक्ष्यप्रदं विद्युज्ज्वालस्फुरचंद्रजिस्मथनुषां ज्योतिष्कला
व्यापितं येडापिंगलमध्यगा त्रिवलया तस्याः प्रबोधोद्धृतं पात्रं सप्तसमुद्ररत्नतरुणानं
दप्रदं पातु मां श्रीमूलतत्त्वं शोधयामि स्वाहा ७ खड्गं श्रीगुरुपादुकां च तिलकं कंठेपि
सारस्वतं शक्तोर्वी गवलंडद्विशौर्यहरणं देहस्थितेः कारणं वांछासिद्धिकरं मनस्थि

श्री
२२
33

तिकरंवशंपंजगत्योषितो पात्रंचाष्टममष्टसिद्धिकरणंवंदेप्रतापालयं इतिशिवत २२
त्त्वंशोधयामिस्वाहा ८ सर्वानंदकरंसदाशिवपदंसर्वार्थसंपत्प्रदं साम्राज्यार्थिक
रंसमस्तसुखदंचाज्ञानविध्वंसनं आयुःकीर्तियशोविवर्धनकरंसंसारमोहच्छिदं पा
त्रंलक्ष्यगुणात्मकंचनवमंप्रौढप्रतापंभजे देवीतत्त्वंशोधयामिस्वाहा ९ ब्रह्मविष्णु
महेशानांदेवानांचविशेषतः दुर्लभंपावनंपात्रंदशमंप्रणमाम्यहं इतिसर्वतत्त्वंशोधया
मिस्वाहा १० पापघ्नंशांतिशुभदंदिव्यंस्वाद्वसुखालयं पात्रमेकादशंवंदेगुरुसेवासु
खोगतं ११ पात्रंकृत्वाकरेमंत्रीसर्वकर्मलभेत्सुखी इहलोकेश्रियंभुक्त्वादेहांतेभैर
वोभवेत् १२ देहस्थाखिलदेवतागजमुखाःक्षेत्राधिपाभैरवा योगिन्योवटुकाश्चसि
द्धपितरःपैशाचकाश्चेटकाः अन्येभूचरखेचराःप्रतिपदंवेतालभूतग्रहाः तृप्ताःस्युः
कुलपुत्रकस्यपिबतःश्रीवीरसंतर्पणात् १३ वामेरामारमणकुशलादक्षिणेचालि
पात्रमग्रेमुद्राचणकवटुकाः सूकरस्योष्णशुद्धिः स्कंधेवीणासरसकवितासत्कथा
सद्गुरूणांकौलोमार्गःपरमगहनोयोगिनामप्यगम्यः १४ अलिपिशितपुरंध्रीभोग

पूजापरोऽहं बहुविधकुलमार्गारंभसंभावितोऽहं पशुजनविमुखोऽहंभैरवीमाश्रितो
ऽहं गुरुचरणरतोऽहंभैरवोऽहंशिवोऽहं १५ करेपात्रंसुखेस्तोत्रमानंदोल्लसद्यांबुजे मूर्ध्नि
श्रीगुरुपादाब्जंस्मरणंकिमतः परं १६ एकेनशुष्कवटुकेनघटंपिबामिवापीपिबामि
सहस्रालवणाईकेण आस्वाद्यमांसमलिरोहितमुंडखंडंगंगांपिबामियशुनांसहसाग
रेण १७ वामेचेद्रमणीसुखेचमदिरापात्रंकरांभोरुहे मूर्ध्निश्रीगुरुचिंतनंभगवतीध्या
नास्पदंमानसं जिह्वायांजपसाधनंपरिणतिःकौलक्रमाभ्यासने येसंतोनियतंपिबं
ति सरसंतेभुक्तिमुक्तीगताः १८ पीत्वापीत्वापुनःपीत्वायावत्पततिभूतले उत्थायचपुनः
पीत्वाभूयोजन्मनविद्यते १९ धर्माधर्महविर्दीप्तेस्वात्माग्नौमनसास्रुचा सुषुम्णावर्त्म
नानित्यमक्षवृत्तीर्जुहोम्यहं २० प्रकाशाकाशहस्ताभ्यामवलंब्योन्मनीस्रुचं धर्माध
र्मकलास्नेहपूर्णांवह्नौजुहोम्यहं २१ यावन्नचलतेदृष्टिर्यावन्नचलतेमनः तावत्पा
नंप्रकर्तव्यंपशुपानमतःपरं एवंपात्रवंदनंकृत्वा ततःपूर्वस्थापितबलिपात्रस्थापि
तमन्नादिकमेकस्मिन्पात्रेकृत्वा सोदकपात्रहस्तः पूजागृहाद्बहिर्गत्वा जलेनशुचौ

श्री
३४
34

देशे च तत्र स्वस्तं त्रिकोणात्मके मंडले कृत्वा चेति पूर्ववत् तत्र गंधादिडमरुपात्रहस्तं त्रिलो ३४
चनं कृत्वा भैरवं देवं सर्वविघ्नविनाशनं वामाधःकरमारभ्य वामोर्ध्वकरपर्यंतमायुधध्या
नं इत्युच्छिष्टभैरवं ध्यात्वा गंधादिभिः संपूज्य ॐ ऐं ह्रीं श्रीं उच्छिष्टभैरव एह्येहि बलिं गृह्ण
२ हुं फट् स्वाहा इति मंत्रेण तस्मिन् मंडले पात्रस्थं बलिद्रव्यं विसृज्य तत्पात्रे हस्तौ पादौ च प्र
क्षाल्य आचम्य तत्पात्रं जलेन प्रपूर्य पूजागृहद्वारं गत्वा उदयोस्तु इति ब्रुवन् अंतः प्रविश्य
स्वासने सूपविश्य तत्पात्रस्थजले विशेषार्घ्यजलबिंदुं दत्वा तेन जलेन स्वात्मानमभिषिंच
य्यांतिस्तोत्रं पठेत् श्रीवामकेश्वरतंत्रे नश्यंतु प्रेतकूष्मांडा नश्यंतु दूषका नराः साधका
नां शिवाः संतु आम्नायपरिपालिनां १ जयंतु मातरः सर्वा जयंतु योगिनीगणाः जयंतु
सिद्धडाकिन्यो जयंतु गुरुपंक्तयः २ नंदंतु अणिमासिद्धा नंदंतु भैरवादयः नंदंतु देवताः स
र्वाः सिद्धविद्याधरादयः ३ ये चाम्नायविशुद्धाश्च मंत्रिणः शुद्धबुद्धयः सर्वदानंदहृदया
नंदंतु मम भक्तितः ४ नक्षत्राणि ग्रहा योगाः करणाश्च तथा परे सर्वे ते सुखिनो यांतु
मासाश्च तिथयास्तथा तृप्यंतु पितरः सर्वे ऋतवो वत्सरादयः भूचराः खेचराश्चैव तृप्यं

न्तममभक्तितः ६ अंतरिक्षचरा ये च ये चान्ये देवयोनयः सर्वे ते सुखिनो यांतु सर्वा नद्या
श्च पक्षिणः ७ पशवस्तरवश्चैव पर्वताः कंधराः गुहाः ऋषयो ब्राह्मणाः सर्वे शांतिं कु
र्वंतु मे सदा ८ तीर्थानि पशवो गावो ये चान्ये श्रमणप्रभृतयः वृद्धाः पतिव्रता नार्यः शिवं
कुर्वंतु मे सदा ९ शिवं सर्वत्र मे चास्तु पुत्रदारधनादिषु राजानः सुखिनः संतु द्वेम मार्गो
स्तु मे सदा १० शुभा मे दिवसा यांतु मित्रास्तिष्ठंतु मे शिवाः साधका जयिनः संतु शिवाः
तिष्ठंतु पूजकाः ११ द्वेष्टारः साधकानां च सदैवाम्नायदूषकाः डाकिनीनां मुखे यांतु सर्वास्तत्प्रि
यैतस्तताः १२ शाम्भवो नाशमायांतु मम निंदाकराश्च ये द्वेष्टारः साधकानां च विनश्यंतु शि
वाज्ञया १३ ये निंदकास्ते विलयं प्रयांतु ये साधकास्ते प्रभवंतु सिद्धाः सर्वत्र देवी करुणा व
लोकात् परः परेशी मम सन्निधत्तां १४ इति शांतिस्तोत्रं पठित्वा अथान्यप्रकारेणापि लिख्य
ते श्रीभैरव उवाच देवि वक्ष्यामि पुण्यां ते शांतिस्तोत्रमनुत्तमम् वीराद्येन पठनेदं पदं प्राप्नो
त्यनामयं १ योगिनीचक्रमध्यस्थं मातृमंडलवेष्टितं नमामि शिरसा नाथं भैरवं भैरवीप्रियं
२ अनादिघोरसंसारव्याधिध्वंसैकहेतवे नमः श्रीनाथवैद्याय कुलौषधप्रदायिने आपदो

श्री
३५
35

दुरितं रोगाः समयाचारलंघनात् ये सर्वत्र व्यपोहन्तु दिव्यचक्रस्य मेलनात् आयुरारोग्य
मैश्वर्यकीर्तिर्लाभाः स्तु विजयः कीर्तिर्मनोरथश्चास्तु पान्तु सर्वाश्च देवताः संपूजकानां
प्रतिपालकानां यतीन्द्रयोगीन्द्रतपोधनानां देशस्य राष्ट्रस्य कुलस्य राज्ञः करोतु शांतिं भग
वान् कुलेशः नन्दन्तु साधककुलान्वयदर्शका ये स्पष्टाद्यनाख्यचतुरक्रममहान्वयाये नन्दे
न्तु सर्वकुलकौलरताः परे ये पुनर्न्ये विशेषपदभेदकर्शा भवाये नन्दन्तु सिद्धगुरवः स्वतन्त्रक्र
मोद्या ज्येष्ठानुगाः समयिनो वटुकाः कुमार्यो षड्योगिनीप्रवरवीरकुलप्रसूता नन्दन्तु
भूमिपतिगोद्विजसाधुलोकाः नन्दन्तु नीतिनिपुणा निरवद्यनिष्ठा निर्मत्सरा निरुपमानि
रुपद्रवाश्च नित्यानिरंजनरता गुरवो निरीहाः शान्ताश्च शान्तमनसो हतशोकशंकाः नं
दन्तु योगनिरताः कुलयोगयुक्ता आचार्यसामयिकसाधकपुत्रकाश्च गावो द्विजाश्च वतयो
यतयः कुमार्यो धर्मे भवेतु निरता गुरुभक्तियुक्ता नन्दन्तु साधकवरा अणिमाद्यनिष्ठाः शापाः
पतन्तु समयद्विषयोगिनीनां साशांभवी स्फुरतु कायिममाद्यवस्थाय स्यां गुरोश्चरणपं
कजमेव लभ्यं याश्चक्रक्रमभूमिकावसतयो नाडीषु याः संस्थिता याः कायद्रुमरोमकू

पनिलयायास्तास्थिताधात्रघु उच्छ्वासोर्मिमरुत्तरंगनिलयानिःश्वाससंवासाश्चयास्ता
देव्योरिप्रभत्तमत्तगणपरास्तथ्येत्रकौलार्चिताः यादिव्यक्रमपालिकाः क्षितिगतायादेव
तास्तोयगा यानिलंप्रस्थिताः प्रभाःशिखिगतायामातरिश्वाश्रयाः याव्योमामृतमं
डलामृतमयायाः सर्वगाः सर्वदास्तास्सर्वाः कुलमार्गपालनपराः शान्तिंप्रयच्छंतुमे
ऊर्ध्वब्रह्मांडतोवादिविगगनतलेभूतलेनिष्कलेवा पातालेवानलेवासलिलपवनयोर्य
त्रकुत्रास्थितावा क्षेत्रेपीठोपपीठादिषुचकृतपदाधूपदीपालिमांसैः प्रीतादेव्यः स
दानःकृतविधिबलिनापांतुवीरेन्द्रवंद्याः ब्रह्माश्रीशेषरुद्रौगुहवटुकगणाभैरवाः
क्षेत्रपाला वेतालादित्यरुद्रग्रहवसुमनुसिद्धाप्सरोगुह्यकाद्याः भूतागंधर्वविद्याधर
ऋषिपितृयक्षानागाहिप्रभूतायोगीशाश्चारणाः किंपुरुषभनिखराश्चक्रगाःपांतु
सर्वे देहस्थाखिलदेवतागजमुखाःक्षेत्राधिपाभैरवा योगिन्योवटुकाश्चयक्षपितरो
भूताःपिशाचाग्रहाः अन्येभूचरदिक्चराश्चखेचरावेतालकाश्चेटकाः तृप्ताःस्युः
कुलपुत्रकस्यापिवतःयानेसवीर्यंचरुं सर्वंचेत्कुरुवाक्यमेवपितृदेवाःशेषवद्योगिनी

श्री
३६
36

प्रीतिश्चेत्परदेवताचयदि चेद्वेदाः प्रमाणं चचेत् शाक्तेयं यदि दर्शनं भवति चेदाज्ञेयमेषा
स्ति चेत्संख्याता अपि च कौलिकाश्च यदि चेत्स्यान्मे जयः सर्वदा त्वय्येव मातरः सर्वाः समुद्राः स
गणाधिपाः योगिन्यः क्षेत्रपालाश्च मम देहे व्यवस्थिताः शिवाद्यवनिपर्यन्तं ब्रह्मादिस्त
वसंयुतं कालाग्न्यादि शिवान्तं च जगद्यज्ञेन तर्प्यताम् पठित्वेदं नमेद्वीरान् वीरवन्दनमाचरेत्
त्तवेद्वीरान्नमेद्वीरान् मेत्र सिद्धिः प्रजायते शान्तिस्तोत्रं पठित्वा वीरवन्दनस्तोत्रं पठेत्
जगत्त्रयाभ्यर्चितशासनेभ्यः परार्थसंपादनकोविदेभ्यः समुद्धृतक्लेशमहोरगेभ्यो नमो
नमः साधकनायकेभ्यः प्रहीणसर्वाशयवासनेभ्यः सर्वार्थतत्त्वोदितसाधनेभ्यः सर्वप्रज्ञा
भ्युद्धरणोदितेभ्यो नमो नमः साधकनायकेभ्यः निस्तीर्णसंसारमहार्णवेभ्यस्तत्स्थालतो
न्मूलनतत्परेभ्यः जरारुजामृत्युनिवारकेभ्यो नमो नमः साधकनायकेभ्यः सद्धर्मरत्ना
करभाजनेभ्यो निर्वाणमार्गोत्तमदेशिकेभ्यः सर्वत्र संपूर्णमनोरथेभ्यो नमो नमः साधक
नायकेभ्यः ४ लोकानुकंपाभ्युदितादरेभ्यः कारुण्यमैत्रीपरिभावितेभ्यः सर्वार्थचर्योप
दिष्टकेभ्यो नमो नमः साधकनायकेभ्यः विध्वस्तनिःशेषकुवासनेभ्यो ज्ञानाग्निनादग्धम

लेंथनेभ्यः प्रज्ञाप्रतिज्ञापरिपूरकेभ्यो नमो नमः साधकनायकेभ्यः सर्वार्थिताशापरिपूरके
भ्यो वैनेयपद्माकरबोधकेभ्यः विस्तीर्णसर्वार्थगुणाकरेभ्यो नमो नमः साधकनायकेभ्यः अ
नेककर्मार्जितशासनेभ्यो ब्रह्मेन्द्ररुद्रादिनमस्कृतेभ्यः परम्परानुग्रहकारकेभ्यो नमो नमः
साधकनायकेभ्यः विभ्रमभ्रान्तादिमहाभयेभ्यो मर्पचकाचारपरायणेभ्यः समस्तसौभाग्य
कलाकरेभ्यो नमो नमः साधकनायकेभ्यः विभ्रमडङ्कर्मजवासनेभ्यः समस्ततोज्झष्टमहाश
येभ्यः लब्धामलज्ञानकृतास्पदेभ्यो नमो नमः शांभविशांभवेभ्यः सर्वागमाम्भोधिमहाल
वेभ्यः श्रीचक्रपूजार्थपरायणेभ्यः श्रीवीरचर्याचरणक्षमेभ्यो नमो नमः शांभविशांभवेभ्यः
श्रीमेत्रकोटिद्युतिभूषणेभ्यो द्वाविंशडङ्गासदशान्तिगेभ्यः अद्वैततत्त्वामृतभाजनेभ्यो न
मो नमः शांभविशांभवेभ्यः षट्त्रिंशतालक्षणभूषितेभ्यः प्रोत्फुल्लपद्माकरलोचनेभ्यः
प्रतप्तचामीकरविग्रहेभ्यो नमो नमः शांभविशांभवेभ्यः संबोधसंभारसुसंस्थितेभ्यः सं
सारनिर्वाणनिदर्शनेभ्यः महाकृपावेष्टितमानसेभ्यो नमो नमः शांभविशांभवेभ्यः प
रैकविज्ञानरसाकुलेभ्यो वामाश्रिताचारभयानकेभ्यः स्वातेजविध्वस्तजगत्तमेभ्यो न

श्री
३२
37

मो नमः शांभवि शांभवेभ्यः श्मशानचर्याप्रमहाफलेभ्यो मोहांधकारापहृतिक्षमेभ्यः
परस्परज्ञापरिपालकेभ्यो नमो नमः शांभवि शांभवेभ्यः विधृतकेशालिकपालकेभ्यः स्वरा
सवारक्तविलोचनेभ्यः नवीनकांतारततत्परेभ्यो नमो नमः शांभवि शांभवेभ्यः विभूति
लिप्तांगदिगंबरेभ्यो चिताग्निधूमातिभयानकेभ्यः कपालपात्रासवपानकेभ्यो नमो नमः
भैरवि भैरवेभ्यः सिद्ध्यष्टकध्यानमहाग्रनिभ्यः श्रीभैरवाचारकृतादरेभ्यः स्वाधीनतान्य
कृतनिर्जरेभ्यो नमो नमः भैरवि भैरवेभ्यः प्रशांतशास्त्रार्थविचारकेभ्यो निवृत्तनानारस
कांक्षकेभ्यः निरस्तनिःशेषविकल्पनेभ्यो नमो नमः भैरवि भैरवेभ्यः स्वात्मैकभावांतरि
ताशयेभ्यः सायुज्यसाम्राज्यसुखाकरेभ्यः श्रीसच्चिदानंदितविग्रहेभ्यो नमो नमः भैरवि भै
रवेभ्यः परप्रसादास्पदमानसेभ्यो ब्रह्माद्वयज्ञानरसाकुलेभ्यः शिवोहमित्याश्रितचेत
नेभ्यो नमो नमः भैरवि भैरवेभ्यः सर्वथा सर्वदा सर्वं सार्वं घटपटादि सत् जगज्जनितवि
स्तारं ब्रह्मेदमिति वेद्म्यहं अहमेव परोहंसः शिवः परमकारणं मत्प्राणे सतत्परस्यात्मा
लीनः समरसं गतः सच्चिदानंदनिलयं परं परमकारणं शिवाद्वयप्रकाशाढ्यं श्याम

लंधामधीमहि अनेनवीरस्तवकीर्तनेन समुद्धृतक्लेशसत्ववासनोऽहं संसारकांतारमहा
र्णवेस्मिन्निमज्जमानंजगदुद्धरेयं नंदंतु साधकाः सर्वे विनश्यंतु विदूषकाः अवस्थाशां
भवीमेस्तु प्रसन्नोस्तु गुरुः सदा इतिपठन् सर्वान् सामयिकानभिषिंच्य विशेषार्घ्यपा
त्रमुद्धृत्य शिरसिस्थितायगुरवे समर्प्य तत्पादुकाभिः समभ्यर्च्य मूलविद्यया गुरुपादुका
विद्यांते च स्वाहेति स्वमूलाधारकुंडलिन्यात्मकपरदेवतामुखे हवनबुद्ध्या तज्जले पात्रे
तरे कृत्वाश्नीयात् शेषं प्रियशिष्याय प्रसादबुद्ध्या किंचिद्दद्यात् सोपि स्वपात्रे कृत्वा
तज्जले प्राश्नीयात् इत्यमर्घ्यप्रतिपत्तिः ततः स्वगुरूपदिष्टविधिना शेषकृत्यं समापयेत्
ततस्ताम्रादिपात्रे गंधपुष्पाक्षतान्वितं जलमापूर्य नमो विवस्वते ब्रह्मन् भास्वते विष्णुतेज
से नमः सर्वजगच्छुचये सवित्रे कर्मदायिने ह्रां ह्रीं हंसः सूर्य एष तेर्घ्यः स्वाहेति सूर्यायार्घ्यं दत्वा
कृतांजलिः यज्ञच्छिद्रं तपश्छिद्रं यच्छिद्रं पूजने मम सर्वं तदच्छिद्रमस्तु भास्करस्य प्र
सादतः इत्यच्छिद्रमवधारयेत् ततो मूलविद्यायाः प्राणायामत्रयं कृत्वा ऋष्यादिक
रषडंगन्यासान् विधाय षडासने वाग्देवताष्टकन्यासान् विधाय प्रागुक्तगुरुस्तोत्रं पठित्वा

श्री
३८
३८

श्रीगुरुं प्रणम्य मूलविद्यया द्वितीयबीजेन निर्माल्यं शिरसि धृत्वा मूलविद्ययाऽऽचरणोद
कं स्वीकृत्य श्रीपरदेवताभक्तेभ्यो नैवेद्यादिकं दत्त्वा स्वयमपि स्वहृद्योथवजैः साकं भुक्त्वा
स्वात्मानं कामकलारूपं भावयन् सुखं विहरेदिति शिवं स्वाज्ञग्रहावामपदेः साहिबकोला
भिधाश्रमे कुलातीर्थ्यार्थिता सैषा शारिकापद्धतिर्लघुः ॥

ॐ श्रीदेव्यै सदाऽस्तु फलदायिन्यै नमः श्रीभैरव उवाच अधुना देवि वक्ष्यामि शारिकाकवचं
परं त्रैलोक्यमोहनं नाम मूलमंत्रमयं परं अस्य श्रवणमात्रेण सर्वयज्ञफलं लभेत् सर्वा
पत्तारणं दिव्यं सर्वसिद्धिप्रदं कलौ सर्वस्वं मे रहस्यं मे परं मे परमाद्भुतं धारणादस्य देवेशि
विस्रुनामजलोद्भवः दानवेन्द्रो हतः शीघ्रं मे धकारो यथेंद्रना मयापि त्रिपुरा ध्वस्तो दा
नवो विस्रुनाबलः जेबोह्यद्रास्तरो देवि प्रभावादस्य वर्मणः कवचस्यास्य देवेशि ऋषिर्भैर
व ईरितः त्रिष्टुप्छन्दो देवता च त्रैलोक्यमोहनेश्वरी शारिका शर्म बीजं च माशक्तिः कील
कं गजः त्रैलोक्यमोहविद्यार्थे विनियोगः प्रकीर्तितः ॐ मे दुर्गा शिरः पायादेकाक्षरवि

भूषणा ॐ ह्रीं चंडी ललाटं मे जगदाह्लादरूपिणी ॐ ह्रीं श्रीं अन्नदा पातु भ्रुवौ मे भगमालि
नी ॐ ह्रीं श्रीं ह्रूं चनेत्रे व्यात् सर्वमंगलमंगला ॐ ह्रीं श्रीं ह्रूं फ्रां श्रवान्मे श्रुती शंकरवल्लभा
ॐ ह्रीं श्रीं ह्रूं फ्रां ग्रों पातु नासां नारायणीश्वरी ॐ ह्रीं श्रीं ह्रूं फ्रां ग्रों शंगं मे पातु वक्त्रं सरस्वती अं
आं इं ईं रदान् पातु मातृकाशेखरेश्वरी उं ऊं ऋं ॠं ऌं ॡं एं ऐं पाया दोष्ठौ भवप्रिया ओं औं अं अः
गले पातु नीलकंठासनेश्वरी कं खं गं घं ङं मे पातु स्कंदौ स्कंदसमर्चिता चं छं जं झं ञं मे
पायाद्धस्तौ वामप्रियांबिका टं ठं डं ढं णं मे पायात् पार्श्वौ पर्वतनंदिनी तं थं दं धं नं मे पा
तु कुक्षिं कुलाकुलेश्वरी पं फं बं भं मं मे पातु नाभिं नारदसेविता यं रं लं वं गुदं पातु गुह्यकेश्वर
पूजिता शं षं सं हं कटिं पातु देवी कात्यायनी सदा लं क्षं ऊरू सदा पातु सर्वसारस्वतप्रदा ॐ
शं जानू शिवा पातु ॐ श्रां जंघे वताडमा ॐ ह्रीं पादौ सदा पातु राजमातंगिनी मम ॐ ह्रूं पा
दादि मूर्धांतं वपुर्मे पातु कुब्जिका ॐ श्रीं मूर्धादिपादांतं वपुर्मे पातु शारदा ॐ ह्रीं समंतात्त रा
पातु शारिका सकलं वपुः पूर्वे मां पातु ब्रह्माणी वह्नौ मे वैष्णवी सदा दक्षिणे वतु मां चं
डी नैरृते मेऽपराजिता पश्चिमे वतु कौमारी वायव्ये शांभवी च मां वाराही चोत्तरे पायादी

घ्राणे नारसिंहिका प्रभाते मां सुमा पातु मध्ये कामावतां स्वमां चार्वंगी मोदितां ते व्यात्रि
ष्ठाद्दैटंकधारिणी निशीथे व्याड्यता रात्रिनिशान्ते पार्वती च मां सर्वत्र रुक्मिणी पातु शि
वा मां पातु सर्वदा असितांगः स्थितः पातु रुरुर्मां पातु पाथसः चंडो मां पातु मरुतः क्रोधो
व्यान्मां हुताशनात् उन्मत्तः सोमतः पातु कपालः सर्वतोवतु भीषणो यज्ञविघ्नोतु संहारः स्व
न्यमंडलात् रणे मां कालिका पातु श्मशाने त्रिपुरसुंदरी दुर्गावतु विवादे मां श्रीचक्रं सर्वदाव
तु सर्वत्र सर्वदा देवी पातु मां शारिका परा धनपुत्रे सुतान्दारान्गृहे यद्वस्तु मामकं त
त्सर्वमशिवः पातु वामदेवस्त्रिदीश्वरः इत्येतत्कवचं दिव्यं त्रिषु लोकेषु दुर्लभं त्रैलोक्यमोह
नेनाम शारिकाया रहस्यकं विनाऽमुनान सिद्धिः स्यात् कवचेनेह पार्वति कोटिलक्ष प्रज
प्तस्य मंत्रस्यास्य महेश्वरि तस्मात्पठेच्छिवे वर्म मंत्रगर्भमनुत्तमे सर्वोत्पातप्रशमनं बल
बुद्धिप्रवर्धनं परमानंददं लोके परमैश्वर्यकारणं यः पठेत्पाठयेद्वापि शृणोति श्रावये
दपि स एव भैरवाख्यस्तु त्रैलोक्यविजयी विभुः रवौ भूर्जे लिखित्वा धर्मं स्वयंभूकुसुमस्त्रजा कु
सुमे नाष्टगंधेन स्त्यानेन निजरेतसा धारयेन्मूर्ध्नि वा बाहौ प्राप्नुयात्परमां गतिं धनकामी

लभेद्धितं पुत्रकामी लभेत्प्रजां रणे विच्छिन्नदेहस्त्वा कल्याणी गृहमाविशेत् धृत्वा वक्षसि देवे
शिवाग्निमित्वं जायते तत्क्षणात् वंध्या च काकवंध्या च मृतवत्सा लभेत्सुतान् मार्कंडेयायुषो
देवि सात्त्वाद्वैश्रवणोपमान् किं किं न लभते मर्त्यः पठन्कवचमुत्तमं यः पठेदर्धरात्रे तु
श्मशाने मुक्तकुंतलः पीत्वा पीधुं स देवेशि देवीदर्शनमाप्नुयात् स्तंभयेद्भास्करं वायुं मो
ये त्रिजगद्ध्रुवं बहु किं कथ्यतां तस्य कवचस्य च धारणात् पठनाच्छ्रवणाद्वापि स भवेद्भैरवो
पमः इतीदं कवचं देवि त्रैलोक्यवशकारणं त्रैलोक्यमोहनं नाम गोपनीयं स्वरेश्वरि यस्य क
स्य न दातव्यं विना शिष्याय पार्वति दीक्षिताय कुलीनाय दत्त्वा मोक्षमवाप्नुयात् विना दानं
न गृह्णीयान्न दद्याद्दक्षिणां विना दत्त्वा गृहीत्वा उभयोः सिद्धिहानिर्भवेद्ध्रुवं अन्यथाय
स्तु गृह्णीयाद्दद्याद्वा कवचेश्वरं पुत्रान्दारान्स्वतांश्चैव योगिन्यो भक्षयंति हि अस्नात्वा
कवचं देवि पूजयेच्छ्रीशिलां शिवे स भवेच्छिवहा सत्यं सर्वोपद्रवसंकुलः धृत्वा यः कवचं दे
वि पूजयेद्देविकां नरः स एव परमां सिद्धिं लभते नात्र संशयः इतीदं कवचं देवि सारं सर्वस्वमु
त्तमं रहस्यं शारिकारत्नं गोपनीयं स्वयोनिवत् इति श्रीरुद्रयामले तंत्रे दशविद्यारहस्ये श्रीशा

श्री
४०

रिकाकवचंसंपूर्णम् ॥

श्रीभैरवउवाच कथयामिपरांविद्यांसहस्राख्याभिधांशिवे शिलायाःशारिकाख्यायाः
परंसर्वस्वरूपिणीं विनानित्यक्रियांदेवि विनान्यासंविनार्चनं विनापुरस्क्रियांजाप्यंवि
नाहोमंचतर्पणं विनाध्यानगमनंविनासम्यक्पूजनं ययालभेत्फलंसर्वंतांविद्यांशृणु
पार्वति यादेवीचेतनालोकेशिलारूपास्तिशारिका स्रजत्यवतिविश्वंतुसंहरिष्यतिताम
ही सैवसंसारिणीदेविपरमैश्वर्यदायिनी परंपदप्रदाय्यंतेमहाविद्यात्मिकाशिला त
स्यानामसहस्रंतेवर्णयामिरहस्यकं रहस्यंममसर्वस्वंसकलाचारवल्लभं योजयेत्परमां
विद्यांपठेदाख्यासहस्रकं धारयेत्कवचंदिव्यंपठेत्स्तोत्रेश्वरंपरं किंतस्यदुर्लभंलोकेना
मुयायद्यदीश्वरि अस्यश्रीशारिकामन्त्रनामसहस्र महादेवऋषिः अनुष्टुप्छंदः श्रीशा
रिकादेवता शांबीजं श्रींशक्तिः फ्रोंकीलकं श्रीविद्यासिद्ध्यर्थेधर्मार्थकाममोक्षार्थेजपे
पाठेविनियोगः बालार्ककोटिद्युतिमिन्दुचूडांवरासिचक्राभयबाहुमाद्यां सिंहाधिरूढां

शिववामदेवलीनां भजे चेतसि शारिकेशी ॐ ह्रीं श्रीं हूं फ्रां श्रों शां श्रीः शारिका श्यामसुंदरी
शिलाशरीरा शुक्लीशं ता श्यामा श्यामपयोधरा देवी शशांकबिंबाभा शशांककृतशेखरा
शार्दूलचर्मवसना शांतिः शार्दूलवाहना गौरी पद्मावती पीना पीनवक्षोजकुड्मला पीतां
बरा रक्तदंता दाडिमीकुसुमोपमा स्फुरद्रत्नांशुखचिता दीप्ता दीप्तशिखोदया दयावती क
ल्पलता कल्पांतदहनोपमा भैरवी भीमनादा च भयानकमुखी भगा कारा कारुण्यरूपा च
कुरुकुल्ला कृशोदरी कादंबरी पटोत्कृष्टा परमा परमेश्वरी सती सरस्वती सत्या सत्यासत्यस्व
रूपिणी परंपरा पटाकारा पाटला पाटलप्रभा पद्मिनी पद्मवनदा पद्मा पद्मकरा शिवा
शिवाश्रया शरच्छांता शची रंभा विभाविनी सुमणिप्रस्तरा पार्वा पीठेशी पीवराकृतिः अ
चिंत्या सुस्तला धारा मातंगी मधुरस्वरा अतीवसुंदराकारा सुंदरी सुंदरालका अलकाना
कमध्यस्था पातालतलचारिणी अनंतानंतरूपा च शमी सर्प मा कवीजिनी विभा सा भास्व
णी च समस्तास्त्ररघातिनी सुधा सुरासुरेशानी कृशाणुवल्लभा हविः स्वाहा स्वाहेशनेत्रा च भूर्भुवः
स्वः स्वरूपिणी भूमिर्भूदेवपूज्या च स्वयंभूः स्वात्मपूजका आनंदकंदली कंदा स्कंदमाता

श्री
४१

शिवालया चेतनाचिद्घनाकारा भवपत्नीभयापहा विघ्नेश्वरीगणेशानी विघ्नविध्वंसिनीनि
शा व्रशनवशिजनस्तुत्यास्तुतिःश्रुतिधराश्रुतिः वेद्यावेदमयीविद्याविधातृवरदावधूः वा
मावामेश्वरीवाम्याकुलाकुलविचारिणी वितर्कातर्कनिलयाप्रलयानलसन्निभा यज्ञेश्वरी
यज्ञफलदायाजकायानपात्रका यत्तेश्वरीयत्नधात्रीपार्वतीपर्वताश्रया पिलंपिलपदस्थाना
पद्दानरकोतका नारीनर्मप्रियाश्रीदाश्रीदश्रीदाशरावुधा कामेश्वरीरतिर्ह्रीतिराहुति
र्हव्यवाहना हरेश्वरीहरिवधूर्हाटकांगदमंडिता हयघास्वर्गतिर्वैद्यास्वर्मुखाचमहौषधिः
सर्वरोगहरासाध्वीमधुकंकणसमप्रभा माधवीमाधवीवल्लीमधुमत्तामदालसा मारप्रियाम
लहराहरित्कांतामनोन्मना महावैद्यप्रियावैद्यावैद्याचारासुरार्चिता सामंतापीनवपुषीगु
टीगुर्वीगरीयसी कालांतकाकालमुखाकठोराकरुणामयी नीलानाडीचवागीशीदूर्वानी
लसरस्वती अपारपारगागम्यागतिःप्रीतिःपयोधरा पयोदसदृशाच्छायापारदाक्तितरा
लसा सरोजनिलयानीतिःकीर्तिःकीर्तिकरीकथा काशीकाम्याकपर्दीशाकाशपुष्पोप
मारमा रमारामप्रियारेवादेवकीदेववत्सला दूतीद्युतिगतिर्दर्भादमिनीविजयाजया

अशेषस्वरसंपूज्या निःशेषास्वरसूदिनी नटिनीवटमूलस्थालास्यहास्यैकवल्लभा अरूपानि
र्गुणी सभ्या सभासंतोषवर्धिनी सोम्यायज्ञविहायाम्यायमुनायामिनीयमी दत्तादायादवर
दादाल्भसेव्यादरीश्वरी पोरंदरीपुलोमेशीपोलोमीपुलकांकुरा समस्तवर्णनिलयासमस्त
गुरुवल्लभा समस्तमुंडमालाढ्या मालिनीमधुपस्वना कोशप्रदाकोशवासाचमत्कृतिरलं
कृता हासदासदसद्रूपासर्वकर्णमयीस्मृतिः सर्वाक्षरमयीविद्यामूलविद्येश्वरीश्वरी अ
कारषोडशाकाराकारा बंधविमोचिनी ककारव्यंजनाक्रांतासर्वमंत्राक्षरालया अमाणु
रूपाप्यमलात्रैगुण्याप्यपराजिता अंबिकाबालिकाचांबा अनंतगुणमेखला अपर्णाप
र्णशालाचसाट्टहासाट्टसंतिका अद्रिकन्यापट्टहासाप्यजरामाप्यरुंधती अज्ञातीचाज्ञि
नीदेवीह्यंबुजासनपूजिता अक्षरामातृकादेवीसर्वानंदकरीकला आनंदसुंदरीआद्या
आघूर्णारुणलोचना आदिदेवांतकाक्रूराआदित्यकुलभूषणा आबीजमंडनादेवीआ
कारमातृकावलिः इंदुस्तुतेंदुबिंबास्याइनकोटिसमप्रभा इंदिरामंडराशालीइतिहा
साकथास्मृतिः इलाचेत्वरसास्वादाइकारादक्षरईश्वरी ईश्वरीभैरवप्राप्याचेशानीश्वरव

श्री ४२ ह्लभा ईशानकामकलादेवीईकाराश्रितमातृका उग्रप्रभोग्रचित्ताचउग्रवामार्गवासिनी
४२ उषावेशवशज्ज्याचउग्रतारोल्मुकानना उमेश्वरेश्वरीश्रेष्ठाउकाराढ्यासमातृका ऌस्लाप्यूषात्रू
42 षणाचतथोतरदिविप्रभा ऋणहर्त्रीऋकारेशीऋऌवर्णाॡवर्णभाक् ॡकारप्रकृतिर्बाला
बालादित्यसमप्रभा एणांकमुकुटादेहाएकाराढ्यासकूटिनी ॐकारशेखरादेवीओंचित्पद
मंडिता ओंभोजनिलयास्थानांओः स्वरूपाचस्वर्गतिः षोडशस्वरसंपन्नाकमलाकमलोद्भ
वा कामेश्वरीरंजितांगीकुमारीकुब्जिकाकला कामाकामप्रियाकीराकमनीयाकपर्दिनी
कालिकाभद्रकालीचकालकामांतकारिणी कपालिनीकपालेशीकर्पूरचयचर्चिता कादं
बरीकोमलांगीकाश्मीरीकुंकुमद्युतिः कुंताकूर्चिणीबीजाढ्याकमलांगीकलाकला क
रालास्याकरालाक्षीविकरालस्वरूपिणी काम्यालकाकामदुग्धाकामिनीकामपालिनी क
न्याधराकृपाकर्त्रीककारान्तरमातृका खड्गहस्ताखर्परेशीखेचरीखगगामिनी खगास
नाखलोलाक्षीखेटेशीखलनाशिनी खेटकायुधहस्ताचखरांशुद्युतिसन्निभा खांताखबी
जनिलयाखकाराढ्यासमातृका गण्यागजास्यवदनागणेशजननीगया गोदावरीगदाह

स्नातागंगाधरवरप्रदा गोधागोवाहनेशानी गरलाशरवल्लभा गांभीर्यभूषणागंगागकारार्णा
विभूषणा घूर्णाघोणाकरस्तस्ताघुर्घुराघोरनादिनी घटस्थाघटजासेव्याघनरूपाघने
श्वरी घनवाहनसेव्याचघकारान्तरमातृका ङोताङवर्णनिलयाज्ञाणरूपाङणालया
ङेशाङेन्ताङङ्गजायाप्याङवर्णान्तरभूषणा चामीकररुचिश्चांद्रीचंद्रिकाचंद्रगामिनी च
लाचोलाचेचलाचचेचरीकालकप्रभा चेचरीकस्वनालापाचमत्कारस्वरूपिणी चट्ट
काचाट्टकीचार्वीचण्पाचण्पकसन्निभा चीनांशुकधराचाट्टस्वकारान्तरभूषणा छत्री
छत्रधराछन्नाछिन्नमस्ताछजाछविः छायासुतप्रियाभायाछवर्णामलमातृका
जगदंबाजगज्ज्योतिर्ज्योतीरूपाजटाधरा जयदाजयकर्त्रीचजगत्कर्त्रीजरोत्तरा ज्वरघ्नी
जंबदमनीजगत्त्राणाजयावहा जैत्रीजैवातृवदनाजीवनाजीववाक्प्रदा जाग्रतिश्च
जगन्निद्राजगद्योनिर्जलेधरा जालंधरजायाजकारान्तरमातृका झंपाझिंझेश्वरीझं
ताझकारान्तरमातृका ञाणरूपाञिणीवामाञकारीशीञलाञधा ञवर्णवीजभूषा
ढ्याञकारान्तरमातृका टंकायुधाटकाराढ्याटोटाटीटमझंतला: टंकायुधाटकीरूपा

श्री
४२

टकारान्तरमात्का टङ्कराटङ्कृरेशानीटकारत्रितयेश्वरी ठः स्वरूपाठवर्णाख्याटकारान्त
रमात्का डङ्कारडङ्केश्वरीडिंबाडवर्णान्तरमात्का ढिणीढेयाढिल्वहस्ताढकारान्तरमा
त्का णीशाणोन्ताणवर्णान्ताणकारान्तरभूषणा तरीतर्यातलारूपात्रिपुरानामसप्रिया
तोतलातारिणीतारासप्तविंशतिरूपिणी त्रिपुरात्रिपुराध्येयात्र्यंबकेशीत्रिलोकधृक् त्रिव
र्गेशीत्रयीत्र्यक्षीत्रिपदावेदरूपिणी त्रिलोकजननीत्राता त्रिपुरेश्वरपूजिता तापसीतोमरप्र
ख्यातबुरुस्वननादिनी तलाकोटिस्वनातापीतपसोफलवर्धिनी तरीतरणिरूपाचत
कारान्तरमात्का स्थलीस्थविररूपाचस्थूलास्थालीस्थलाब्जिनी स्थविरेशास्थूलमुखी
थकारान्तरमात्का इतिकाशिवहस्तीचदेडायुधधराद्युतिः दयादीनानुकंपाचदंबोलिध
रवल्लभा देशानुचारिणीदेकाद्राविढेशीदवीयसी शत्तायणीदमलतादेवमातापिदेवता
दपिजाडर्लभादेवीदकारान्तरमात्का धर्माधर्मप्रसूर्धन्याधनदाधनवर्धिनी धृतिर्धृता
धन्यवधूर्धकारान्तरमंडला नलिनीनालिकानाभ्यानाराचायुधधारिणी नीपोपवनम
ध्यस्थानागरेशीनरोत्तमा नरेश्वरीन्दपाध्यक्षानरनारायणप्रसूः नर्तकीनीरजाक्षीच

नवर्णोत्तरभूषणा पद्मेश्वरी पद्ममुखी पद्मयाना परापरा पारावारसुता पीता परवर्गवि
मर्दिनी पृः पुरारिवक्षःपा पापापत्नी पक्षिणवाहना पीवरांसा पतिप्राणा पीतलाङ्गी पति
व्रता पाण्डा पीठस्थिता पीताम्बरालंकारभूषणा पुरूरवसुता पौत्री पुत्रिका पुत्रदा प्रजा
पुष्पोत्तंसा पुष्पवती पकारान्तरमातृका फलदायीनवस्त्रा च फेरवारावभीषणा फल्गु
णी फल्गुतीर्थस्था फवर्णीकृतमण्डला बलदा बालखिल्या च बाला बलरिपुप्रिया बाल्या
वस्था बर्बरेशी बकाराकृतिमातृका भद्रिका भीमपत्नी च भीमा भर्गशिखा भया भयघ्नी भी
मनादा च भयानकमुखेक्षणा भिल्लेश्वरी भीतिहरा भद्रदा भाग्यवर्धिनी भगमाला भगावामा
भवघ्नी भवतारिणी भगयोनिर्भगाकारा भगस्था भगरूपिणी भगलिङ्गामृतप्रीता भका
रान्तरमातृका मान्या मानप्रदा मीना मीनकेतनलालसा मदोद्धता मनोन्मान्या मिना मेनाक
वत्सला मानार्तिर्मत्स्यरूपा च मत्स्यघाता महत्तरा मेरुशृंगाग्रतुंगास्या मोदकाहारसज्जका
मातङ्गिनी मत्तमदा मदमत्ता महेश्वरी मज्जा मुग्धानना मुग्धा मकाराकारभूषणा यश
स्विनी यतीशानी यत्नकर्त्री यजुःप्रिया यज्ञधात्री यज्ञफला यजुर्वेदऋचोफलं यशोदाय

श्री
४४
55

तिसेव्याचयात्रायात्रिकवत्सला योगेश्वरीयोगगम्यायोगेन्द्रजनवत्सला यज्ञसूत्रीयमन्त्री ४४
चयकारान्तरमातृका रत्नेश्वरीरमानाथसेव्यारथ्यारजस्वला राज्यदाराजराजेशीरोग
हर्त्रीरजोवती रत्नाकरसुतारम्याराज्ञीराज्यपतिप्रभा रक्तोघ्नीराक्षसेशानीरक्तोनाथसम
र्चिता रतप्रियारतस्वारकाराकृतिशेखरा लंबोदरीललज्जिह्वालास्यतत्परमानसा
लूतातंतुवितानास्यालक्ष्मीर्लीजालयाविणी लोकेश्वरीलोकधात्रीलाटस्यालक्षणाग
कृतिः लेकालेवकचोल्लासालकाराकारवर्धिनी लिंगप्रीताकलिंगेशीलिंगस्यालिंग
लिंगिनी लिंगेश्वरीलिंगरसालिंगमालालसद्युतिः लयदालक्षणालोलालकारान्तरमा
तृका वाराहीवरदात्रीचवीरसूर्वीरनन्दिनी वीरेश्वरीवीरजन्यावीरचर्वणचर्चिता वरा
युधावराकाचवामनावसनाकृतिः वधता वधकावध्यावध्यभूर्वणिजप्रिया वसंतलक्ष्मी
र्वटुकीवटुकावटुकेश्वरी वटुप्रियावामनेत्रावामाचारैकलालसा वीतावाप्यावरारोहावे
दमातावसुंधरा वयोयानावयस्याचवकाराचारमातृका शंभुप्रियाशरच्चर्चापाण्डव
लाशाशवत्सला शीतद्युतिःशीतरसाशोणोष्ठीशीकरप्रभा श्रीवत्सलाञ्छनाशावीश

र्वेवामोगवासिनी शाशांकामललक्ष्मीश्च शार्द्दलतनुरडिजा शोध्यहंत्रीशमीमूलाशाका
राकृतिशेखरा षोडशीषोडशोन्नेसाषाडाषोढाषडानना षड्कूटाषड्रसास्वादाषडशी
तिभुजोवुजा षडास्यजननीषएढाषवर्णातरमातृका सारस्वतप्रस्तुःसर्वासर्वगासर्वतो
मुखा समासीतासतीमातासागराभयदायिनी समस्तपापशमनीसालभंजीसुदक्षिणा
सुषुम्निस्वरसासाध्वीसामगासामवेदजा सत्यप्रियासोमगर्भासूत्रस्थासुतवल्लभा सन
केशीसनंदाचसुवर्गस्थासनातना सेतुभूतासमस्ताशासकाराकारवल्लभा हालाहलप्रि
याहेलाहाहारावविभूषणा हाहाहूहूस्वरूपाचहलधात्रीहलप्रिया हरिनेत्राद्योरहस्याहृ
विद्याहेतिवल्लभा हंहंःलंलंःस्वरूपाचसर्वमातृकपूजिता ॐऐंसौंःह्रींमहाविद्याश्रांश्रींफ्रां
हूंस्वरूपिणी इतिश्रीशारिकादेव्यामंत्रनामसहस्रकं पुण्यंपुण्यजनस्तुत्यंतत्वंतत्वैस्स
वपूजितं इदंयःपाठयेद्देविश्रावयेद्वाशृणोतिवा सएवभगवान्देवःसत्यंसत्यंसुरेश्व
रि एककालेद्विकालेवात्रिकालेपठतेनरः वामाचारपरोदेवितस्यपुण्यफलंशृणु
मूकत्वंबधिरत्वंचकुष्टंहन्याश्चश्वित्रिकं वातपित्तकफान्गुल्मान्रक्तस्रावंविषूचिकां

श्री ४५

45

सद्यः शमयते देवि श्रद्धया यः पठेन्निशि अपस्मारं कर्णपीडां शूलं रोगं भगंदरं मासमात्रं प
ठेद्यस्तु स रोगैर्मुच्यते ध्रुवं भौमे शनिदिने वापि चक्रमध्ये पठेद्यदि सद्यस्तस्य महेशानि शा
रिका वरदा भवेत् चतुष्पथे पठेद्यस्तु त्रिवारं रात्रिमध्यगे दत्त्वा बलिं सुरां गुड्डं मत्स्यमांसं
च भक्तकं बकुलत्वथ समाकीर्णं शारी प्रादुर्भविष्यति यः पठेद्देवि लोलायां चितायां शव
सन्निधौ पायंपाये त्रिवारं तु तस्य पुण्यफलं शृणु ब्रह्महत्यां गुरोर्हत्यां सुरापानं च गोवधं
महापातकसंघातं गुरुतल्पगतोद्भवं स्तेयं वा भ्रूणहत्यां च नाशयेन्नात्र संशयः स एव
हि रमापुत्रो यशस्वी लोकपूजितः वरदानक्षमो देवि वीरेशो भक्तवल्लभः चक्रार्चने पठेद्य
स्तु साधकः शक्तिसन्निधौ त्रिवारं श्रद्धया युक्तः स भवेद्भैरवेश्वरः किं किं न लभते देवि सा
धको वीरसाधकः पुत्रवान्धनवांल्लोके सत्याचारपरः शिवः शक्तिसंपूज्य देवेशि पठेत्स्तो
त्रेपरामयं इह लोके सुखं भुक्त्वा परत्र त्रिदिवं व्रजेत् इति नामसहस्रं तु शारिकाया मनोहरं
गोप्यं गुप्ततमं लोके गोपनीयं स्वयोनिवत् इति श्रीरुद्रयामले तंत्रे दशविद्यारहस्ये शा
रिकामेत्रनामसहस्रं संपूर्णम् ॥

४५

ॐनमोदेव्यै श्रीभैरवउवाच शृणुदेविप्रवक्ष्यामि स्तोत्रंमंत्रात्मकंपरं पंचांगभूतंसर्व
स्वंमंत्रकोटिफलप्रदं अस्यश्रीशारिकास्तवराजस्य श्रीमहादेवऋषिः त्रिष्टुप्छंदः
श्रीशारिकादेवता शांबीजं श्रींशक्तिः फ्रांकीलकं श्रीविद्यासिद्ध्यर्थेस्तवराजपाठे
विनियोगः अथध्यानं बालार्ककोटिद्युतिमिंदुचूडांवरासिचक्राभयबाहुमाद्यां
सिंहाधिरूढांशिववामदेवलीनांभजेचेतसिशारिकेशीं १ अहंअहंतवमनुशिरोमौ
लिमाणिक्यभूतं ध्यायेच्चित्तेशशिधरकलाबिंदुबिंबावतंसं योमंत्रेशंजपतिमनसामा
ननीयोमहद्भिः धन्यःपुण्यैःसभवतिमरुद्धीज्यमानोमरुत्वान् २ पराबीजंतेजोनि
धिमधिमनोयःप्रजपते जगन्मोहध्वांतामितपटलसूर्योदयमिदं सलोकेशोभूत्वावि
चरतिमहामौक्तिकमणिः धराधीशानांकेफणिगिरियथेच्छंत्रिभुवने ३ माबीजमानं
दजमिंदुबिंबचूडंजपेद्यस्तवमंत्रमध्ये सदेविदेवेश्वरविष्टरार्धनिविष्टईशन्मदिराघूर्णि
तः ४ कूर्चचमत्काररसत्प्रसादंजपेच्छिवेयःस्मरकेलिलोलः हुंकारमात्रेणसवैरि
वर्गंहत्वाभवेद्भूपतिसार्वभौमः ५ गजार्णमाकर्ण्यजपेत्क्षणंयोमग्नेक्षणापीनकुचांतर

श्री
४६ स्थः स मेनकाकामरणप्रवीणो लीलावतीकेलिकलां करोति ६ शून्यं बीजं मंत्रमध्ये जपे
द्यो मूढो जाड्यांभोधिमध्ये निमग्नः तस्यास्याज्ज्ञानिः सरंते स्ववाचो गद्यैः पद्यैर्मधुसारप्र
46 चाराः ७ कल्याणबीजं यदि साधकेंद्रो जपेच्छिवे चेतसि वार्धरात्रे स भोगवांल्लभ्यपरो
नरेंद्रो भोगावतीं प्राप्य भवेद्व वेशः ८ श्रीशारिकायै तव मंत्रमध्ये यो नाम मंत्रं जपते महे
शि तस्याजिभूमौ रिपुवर्गलक्ष्मीर्वशे भवेत्साधकलोकमौलेः ९ अपमरी बीजमीशा
नि यो जपेदर्धरात्रके सिंहासना भगवती वरदा दर्शनप्रदा १० बिंदुत्रिकोणवसुकोण
सहस्त्रनागपत्रत्रिवृत्तपथरणीगृहमंडलस्थां बालार्कबिंबसदृशाननबिंबपद्मां यो ध्याय
ते वश भवेद्भुविसार्वभौमः ११ यो बिंदुः स पितामहो हरिरसौ रुद्रः स्वराः कीर्तितो येरेफो
ङ्गरितौघमर्दनकरो रुद्रः सदा गीयते यः प्राणः स परः स एव भगवान्नादः शिवः सर्वदा
देवी चंद्रकलाकलंकरहिता मायेति तुभ्यं नमः १२ श्रीशारिकास्तवमिमं पठते प्रभाते
यो वार्धरात्रसमये र्चनकर्मकाले इंद्रः सुरासुरयतः स्वयमेत्य तस्य पूजां विधाय दधते त्रिदि
वाधिपत्यं १३ इतीदं देवि पंचांगं शारिकाया रहस्यकं सर्वस्वं परमं गुह्यं त्रैलोक्योद्धरणक्ष

मे १४ पुण्यं पवित्रमायुष्यं श्रेयस्करं यशस्करं मकारैः पंचभिः पूज्यं साध्यं साधकस
त्तमैः संवत्सरेण पुत्रवद्देवि दर्शयेदिष्टविन्नवत् इदं रहस्यमाख्यातं शारिकासारमुत्तमं अभ
क्ताय न दातव्यं कुचैलाय दुरात्मने निंदकायान्यशिष्याय सत्यं मे त्रीनिरयी भवेत् श्रीदेव्यु
वाच भगवन्भवतानेन पंचांगकथनेन हि कीतास्मि तव दासास्मि किमन्यत्कथयामि ते
श्रीभैरव उवाच पंचांगं तत्त्वमीशानि शिलासर्वस्वमुत्तमं गुह्याद्गोप्यतमं देवि गोपनीयं स्व
युक्तिभिः इति श्रीरुद्रयामले तंत्रे दशविद्यारहस्ये श्रीशारिकाभगवतीस्तवराजः समाप्तः ॥

अथ महागणपतिजपविधिः अस्य श्रीमहागणपतिमंत्रस्य श्रीब्रह्मा ऋषिः गायत्रं छं
दः श्रीमहागणपतिर्देवता गं बीजं ह्रीं शक्तिः नमः कीलकं श्रीवज्रविद्यासिद्ध्यर्थे जपे वि
नियोगः अथ न्यासः ब्रह्मा ऋषये नमः शिरसि गायत्रं छंदसे नमो मुखे श्रीमहागणपति
देवतायै नमः हृदि गं बीजाय नमः गुह्ये ह्रीं शक्तये नमः पादयोः क्रुरु क्रुरु कीलकाय न
मः नाभौ सर्वविद्यासिद्ध्यर्थे जपे विनियोगः सर्वांगेषु अथ करन्यासः गां अंगुष्ठाभ्यां नमः

श्री ४७

४७

गींतर्जनीभ्यांस्वाहा गूंमध्यमाभ्यांवषट् गैंअनामिकाभ्यांहुं गौंकनिष्ठिकाभ्यांवौषट् गः करतलकरपृष्ठाभ्यांफट् गांहृदयायनमः गींशिरसेस्वाहा गूंशिखायैवषट् गैंकवचायहुं गौंनेत्रत्रयायवौषट् गःअस्त्रायफट् अथध्यानं गजवदनमचिंत्यंतीक्ष्णदंष्ट्रंत्रिनेत्रं बृहदुदरमनेतंदंतमालेदपंतं परशुचषकपद्मंदेहहस्तारविंदं हरियुगलनिविष्टंश्रीगणेशंभजामि अथमूलविद्या ॐश्रींह्रींक्लींग्लौंगंगणपतयेवरवरदसर्वजनमेवशमानयस्वाहा गुह्यातिगुह्यगोप्तात्वमित्यादौ योनिमुद्रयाप्रणमेत ॥

अथवामदेवजपविधिः अस्यश्रीवामदेवभैरवमंत्रस्य श्रीकालाग्निरुद्रऋषिः त्रिष्टुप्छंदः श्रीशारिकेश्वरोवामदेवोदेवता ह्रांबीजं वांशक्तिः ॐकीलकं श्रीविद्यासाधनेजपेविनियोगः श्रीकालाग्निरुद्रायनमःशिरसि त्रिष्टुप्छंदसेनमोमुखे श्रीशारिकेश्वरोवामदेवोदेवतायैनमोहृदि ह्रांबीजायनमःगुह्ये वांशक्तयेनमःपादयोः ॐकीलकायनमःनाभौ जपेविनियोगःसर्वांगेषु वांअंगुष्ठाभ्यांनमः वींतर्जनीभ्यांस्वाहा वूंमध्यमाभ्यांवषट् वैंअनामि

काभ्यांऽं वैंकनिष्ठिकाभ्यांवौषट् वः करतलकरपृष्ठाभ्यांफट् वांहृदयायनमः वींशि
रसेस्वाहा वूंशिखायैवषट् वैंकवचायऽं वौंनेत्रत्रयायवौषट् वः अस्त्रायफट् अथध्यानं
पूर्णेंदुकोटिप्रभमिंदुचूडं कपालखट्वांगगदासिहस्तं भस्मास्थिमालोचितगात्रमाद्यंश्री
वामदेवंशिवमाश्रयामि ॐ ह्रीं वौंवामदेवायनमः जयंते गुह्यातिगुह्य० योनिमुद्रयाप्र
णमेत् ॥

अथश्रीस्कंदपुराणोक्तश्रीदेवीगाथा हरिहरपंकजयोनिसमर्चितपादयुगेविजये कृतम
हिषासुरदर्पनिवारणतत्क्षणलब्धजये भगवतिदेविमहाभयनाशिनिनिर्मलभक्ति
परे जयजयदेविममामृतवर्षिणिदर्शनमेहिपरे १ सकलचराचरविश्वकृतस्थितिस
र्गमहाप्रलये मनुजसुरासुरकिन्नरसिद्धसुरेंद्रकृपानिलये दितिसुतसंभनिसुंभर
णस्थलनिर्मलजीवलये जयजयदेविममामृतवर्षिणिदर्शनमेहिपरे २ परमसमा
धिपरायणसज्जनरूतकुहरांतरगे भवमलकर्दममग्नशरीरसमुद्धरणैस्सुभगे स्वय

श्री ४८ 48

मनिरुद्धभुजंगमपाशनिकृंतनिदिव्यभगे जयजयदेविममामृतवर्षिणि दर्शनमेहिपरे ३
असितकृशोदरदैवतयापरिशूणिशरीरधरे रिपुरुरुदानवदेहविनिर्गतरक्तनिपानकरे वस्र
दशबाहुविलग्नभुजंगमकंकणकोटिधरे जयजयदेविममामृतवर्षिणि दर्शनमेहिपरे ४
उपवनकोकिलषट्पदनिःस्वनमंजुलसद्वचने भवार्णवदुस्तरदुःखनिवारणकारिणि सा
धुजने सितकरपंकजबंधुहुताशनमूर्तिकचन्नयने जयजयदेविममामृतवर्षिणि दर्शनमेहि
परे ५ अनुपमडामरयागविमोहितमोहितमुग्धहरे नवनवतोडवडंबरचर्चितसर्वविरिंचि
परे जननिचसद्गुरुवक्त्रनिवासिनिचित्रचरित्रधरे जयजयदेविममामृतवर्षिणि दर्शनमेहि
परे ६ अविरतपीठचतुष्टयवासिनिमातृगणैःसहिते हृदयपद्माङ्गनभोगतनिर्मलवा
सवचापलते असितसितारुणनीलहरिद्रसमाश्रितरूपशते जयजयदेविममामृतवर्षि
णि दर्शनमेहिपरे ७ त्रिभुवनमोहिनिकालकलंकिनिवामनयेवितते दिनकरकोटिश
तप्रविभासिनिभारतवर्षमते अनिहितकुंडलिनीकुहरोत्थितनिश्चलधूमलते जयजयदे
विममामृतवर्षिणि दर्शनमेहिपरे ८ प्रमथितसंदृशनीडसुरौघविशोपतिदत्तसुखे भुवि

मधुकैटभदानवमांसस्रभक्षिणि घोररूपे अविनवनिर्मलकीर्तिधराननपापहरे विजये
जयजयदेविममामृतवर्षिणि दर्शनमेहिपरे ४ भगवति पंचमुखेश्वरिरुद्रसुखासनगे
समये अकृतकवेदचतुष्टयमातरिहस्तवयमेवदये त्रिजगति नित्यमनुग्रहशायिनि साधुज-
नेसुभगे जयजयदेविममामृतवर्षिणि दर्शनमेहिपरे इतिश्रीस्कंदपुराणे देवीगाथाः ॥

ॐश्रीगणेशायनमः वंदेदेवीं शारिकां मोक्षदात्रीं सर्वस्थां तां सर्वतो मोहदात्रीं मिथ्यासं-
त्सुप्रान्निर्द्भीतिदात्रीं सद्भक्तानां हृत्सुषुम्नांचिदंशस्थधात्रीं १ तारं बीजं योजपेदेवभक्त्या संसाराब्धे-
स्तारके शारिके ते ब्रह्मज्ञानप्रौढयाप्रज्ञयायं वाचांनाथस्यापि कुर्याद्विहासं २ ईशंसा-
ङ्गेवह्निसंस्थं सपद्मं बीजं ते न्यस्य चः स्मरेत्तं स्मरंति नाकेदेव्यो भूतलेनागपत्न्यो भूमौ नार्यो वि-
ह्वलामारबाणैः ३ लक्ष्मीबीजं दुर्लभं दुर्जनानां सम्यग्भक्त्या यो जपेच्चक्षुरद्वज्ञहैः पद्मानि-
त्ये दर्शनं वीक्ष्य रस्य द्वारे तिष्ठत्यादराच्चेचलापि ४ ईशंसाङ्गं वामकर्णार्धसंस्थं बीजं ते न्य-
स्योजपेत्तस्य शत्रुः सर्वैर्देवैरप्यजय्यः क्षणेन दृष्टैः पातायामगेहातिथिः स्यात् ५ ईशंबी

श्री
४९
49.

जेवक्त्राहृत्तेनयुक्तं साङ्गंयोन्यत्संजपेद्दक्षिसंस्थे भुक्तिर्मुक्तिः सद्विचारस्ययुक्तिर्भक्तिस्त्वेत
द्धस्तयाताभवेति ६ साङ्गंबीजंवक्त्राहृत्तंजपेद्यः सम्यग्भक्त्यास्वहृद्रूपच्छारिकेते वाणीनाना
सद्मैस्त्रंभितस्त्रीर्नित्यंवक्त्रेतिष्ठतिप्रौढमस्य ७ साङ्गंबीजंवक्त्राहृत्तेनयुक्तमस्यात्मा ध्ये
योजपेच्छारिकेते जीवन्मुक्तस्त्विहभुक्त्वातिभोगान् लीनः पश्चात्त्वत्पदस्याङ्घ्रिवाति ८ एतद्वी
जप्रोतगोश्चारिकायाश्चत्वा ध्यात्वा संजपेद्योनमोन्तं तत्तेधामप्राप्यतेतेनशश्वद्धत्वाभूयः शोग
चातेनैवयत्र ९ संस्तोमित्वांत्वामिमामाश्रयेहं सेवेदेवीमेवसर्वैकशक्तिं त्वामन्येषैर्गीग्र
दे संब्रवीमि सर्वोस्यार्वा सर्वतोभावयामि १० जातः सोसौसत्कुलेतस्यधन्यामाताततस्मि
न् संगताश्चाशिषश्च ज्ञातंसर्वंतेनशंभुप्रियायाः सम्यक्पूजानिर्मितायेनभक्त्या ११ भ
क्तिः पुस्त्वात्वन्वहंमां त्वदीयानित्यंयहृत्तत्पूर्णचंद्रोदयोभूत् त्वद्भक्तैः सत्संपदाप्राप्तयाहंजि
स्मार्तलक्ष्मीश्चाप्युपेतेश्वरोगां १२ एतत्सर्वंत्वन्मयंदेवदेवित्वंचिद्रूपाकेवलास्वप्रसिद्धा ना
नास्त्यज्ञानंक्वापितस्मात्क्वदृष्टो वंध्यापुत्रश्चापमारोप्यधावन् १३ आशास्तेमेदेवभावेन
चिंतस्तूतेः कालेस्त्रीवभोगेकदाचित् त्वत्सद्भक्त्यान्त्यतिप्राप्तयालेगायन्स्तुत्वामेवनाहं

शिवेव १४ साकाष्ठ्मिर्यत्रनास्तिस्थितिस्त्रेसाकावाणीनोचसेवाययात्वं कोसौ शाश्वच्छ्रू
यसेयत्रनत्वेकोसौभावोयत्रतेभासनेनो १५ त्वत्पद्मस्नकौंदयात्तेप्रफुल्लेस्वतपसेमेत्सङ्ग
तातसङ्गसेहं नित्यंयस्मिन्सर्वदाकौलगणीयासर्वैस्त्विष्ट्यादरान्मोत्तलक्ष्मीः १६ ज्ञान
स्वामिप्राप्तसद्बुद्धिसारज्ञातज्ञेयः सर्वतः स्वात्मभावी स्तोत्रंमेत्रोद्दार्यदः शारिकायाः सा
हिबकौलोवेशदेव्यास्त्वकार १७ योवाप्येतत्कीर्तयतस्तोत्रमाध्येसमप्यगभक्त्याश्रोष्यतिश्रा
वयेद्वा निर्मित्रोपिप्राप्नुयाद्द्वेवदेविनिःसंदेहंमेत्रजेसत्फलेसः १८ इतिश्रीमहामाहे
श्वरमहाचार्यसाहिबकौलविरचितंशारिकास्तोत्रंसंपूर्णं ॥

ॐश्रीगुरवेनमः नमस्कृत्यमहादेवंविश्वव्यापिनमीश्वरं वक्ष्येशिवमयंवर्मसर्वरक्षाकरंन्
णां शुचौदेशेसमासीनोयथावत्कल्पितासनः जितेंद्रियोजितप्राणः चिंतयेच्छिवमः
व्ययं २ हृत्पुंडरीकांतरसन्निविष्टंस्वतेजसाव्याप्तनभोवकाशं जितेंद्रियंसूक्ष्ममनंतमा
द्यंध्यायेत्परानंदमयंमहेशं ध्यानावधूताखिलकर्मबंधश्चिरंचिदानंदनिमग्नचेतः ष

श्री
५०
56

उत्तरन्याससमाहितात्माशैवेनकुर्यात्कवचेनरक्षां मांपातुदेवोखिलदेवतात्मासंसारकू
पेपतितंगभीरे यन्नामदिव्यंवरमंत्रमूलंधुनोतुमेसर्वमघंहृदिस्थं सर्वत्रमोरक्षतुविश्वमू
र्तिर्ज्योतिर्मयानंदघनश्चिदात्मा अणोरणीयानुरुशक्तिरेकः सईश्वरःपातुभयादशेषात्
योभूस्वरूपेणबिभर्तिविश्वंपायात्सभूमेर्गिरिशोष्टमूर्तिः योपांस्वरूपेणनृणांकरोति
संजीवनंसोवतुमेजलेभ्यः कल्पावसानेभुवनानिदग्ध्वासर्वाणियोनृत्यतिभूरिलीलः
सकालरुद्रोवतुमांदवाग्नेर्वात्यादिभीतेरखिलाच्चपापात् प्रदीप्तविद्युत्कनकावभासः
सदावराभीतिकुठारहस्तः चतुर्मुखस्तत्पुरुषस्त्रिनेत्रः प्राच्यांस्थितोरक्षतुमामजस्रं
कुठारवेदांकुशपाशशूलढक्काक्षमालाहिगणान्दधानः चतुर्मुखोनीलरुचिस्त्रिने
त्रःपायादघोरोदिशिदक्षिणस्यां कुंदेंदुशंखस्फटिकावधातोवेदाक्षमालावलयाभयो
कः त्र्यक्षश्चतुर्वक्त्रउरुप्रभावः सद्योधिजातोवतुमांप्रतीच्यां वराक्षमालाभयढक्कहस्तः
सरोजकिंजल्कसमानवर्णः त्रिलोचनश्चारुचतुर्मुखोमांपायादुदीच्यांदिशिवामदेवः
वराभयेष्टांकुशपाशशाङ्कं कपालढक्काक्षत्रिशूलपाणिः सितद्युतिःपंचमुखोवतान्मामी

स्थानमूर्द्ध्वंपरमप्रकाशः मूर्धानमव्यान्ममचंद्रमौलिः भालंममाव्यादथभालनेत्रः नेत्रेममाव्या
द्भगनेत्रहारी नासांसदारक्षतुविश्वनाथः पायाच्छ्रुतीमेश्रुतगीतकीर्तिः कपोलमव्यात्सततं
कपाली वक्त्रंसदारक्षतुपंचवक्त्रो जिह्वांसदारक्षतुवेदजिह्वः कंठंगिरीशोवतुनीलकंठः पा
णिद्वयंपातुपिनाकपाणिः दोर्मूलमव्यान्ममधर्मबाहुर्वक्षःस्थलंदक्षमखांतकोव्यात् ममो
दरंपातुगिरींद्रधन्वा मध्यंममव्यान्मदनांतकारी हेरंभतातोममपातुनाभिंपायात्कटिंधूर्जटि
रीश्वरोमे ऊरुद्वयंपातुकुबेरमित्रोजानुद्वयोव्याज्जगदीश्वरोमे जंघाद्वयंपुंगवकेतुरव्यात्
पादौममाव्यात्सुरवंद्यपादः महेश्वरःपातुदिनादियामे मांमध्ययामेवतुवामदेवः त्रियंबकः
पातुतृतीययामे वृषध्वजःपातुदिनांतयामे पायान्निशादौशशिशेखरोमां गंगाधरोरक्षतुमां
निशीथे गौरीपतिःपातुनिशावसाने मृत्युंजयोरक्षतुमांप्रभाते गृहस्थितंरक्षतुशंकरोमां
स्थाणुःसदापातुबहिःस्थितंमां तदंतरेपातुपतिःपशूनां सदाशिवोरक्षतुमांसमंतात् ति
ष्ठंतमव्याद्भुवनैकनाथः पायाद्व्रजंतंप्रमथादिनाथः वेदांतवेद्योवतुमांनिषण्णं ममाव्ययःपा
तुशिवःशयानं मार्गेषुमांरक्षतुनीलकंठः शैलादिदुर्गेषुपुरत्रयारिः अरण्यवासादिमह

श्री
५१
51

तत्प्रयासेनयायान्मृगव्याधउदारशक्तिः कल्पांतकालोग्रकटुप्रकोपस्फुटाट्टहासस्खलितां
डकोशः घोरारिसेनार्णवदुर्निवारमहाभयाद्रक्षतुवीरभद्रः पत्यश्वमातंगघटावरूथि
नीसहस्रलक्षायुतकोटिभीषणं अक्षौहिणीनांशतमाततायिनो छिंद्यान्मृडोघोरकुठा
रधारया निहंतुदस्यून्प्रलयानलार्चिर्ज्वलत्रिशूलंत्रिपुरांतकस्य शार्दूलसिंहर्क्षमृगादि
हिंस्रान्संत्रासयेद्विश्वधनुः पिनाकः दुःस्वप्नदुःशकुनदुर्गमदौर्मनस्यदुर्भिक्षदुर्व्यसनदुःस
ह्यदुर्यशांसि उत्पातशापविषभीतिमसद्ग्रहार्तिव्याधींश्चनाशयतुमेजगतामधीशः/ ॐनमो
भगवतेसदाशिवाय सकलतत्त्वात्मकाय सकलतत्त्वविहाराय सकललोकैककर्त्रे सकललो
कैकभर्त्रे सकललोकैकहर्त्रे सकलनिगमगुह्याय सकललोकैकवरप्रदाय सकलदुरिता
र्तिभंजनाय सकलजगदभयंकराय शशांकशेखराय शाश्वतनिजावासाय निराहाराय
निष्प्रपंचाय निर्द्वंद्वाय निःसंगाय निर्गुणाय निरुपमविभवाय निराधाराय नित्यशुद्ध परि
पूर्णचिदानंदानंताद्वयपरमप्रकाशाय तेजोमयाय जयजय महारुद्र भवावतारमहाभैरव क
पालभैरव कालांतकभैरव कपालमालाधर खट्वांगचर्मपाशांकुशडमरुत्रिशूलचापबाणः

सिगदाशक्तिभिंडिपाल तोमर मुद्गर प्रासपरिघभुसुंडिशतघ्निचक्रायुध भीषणकर सहस्रमु
ख दंष्ट्राकरालविकटाट्टहासविस्फारितब्रह्मांडमंडल नागेंद्रकुंडल मृत्युंजयांतकांतक कामां
तक त्रिपुरांतक विरूपाक्ष विश्वरूप विश्वेश्वर वृषभवाहन विश्वभूषण षड्भूषण विश्वतोमु
ख सर्वतोमुख सर्वतोरक्ष मां ज्वलज्वल महामृत्युमपमृत्युभयंनाशयनाशय चौरान्नाशयनाश
य शत्रूनुच्चाटय२ त्रिशूलेनविदारय २ कुठारेणभिंधि२ खट्वांगेनविपोथय२ मुसलेननि
ष्पेषय२ रक्षांसिभीतय२ भूतानिविद्रावय२ कूष्मांडवेतालमारीगणब्रह्मराक्षसगणान् सं
त्रासय२ ममाऽभयंकुरुकुरु विश्वस्तमाश्वासय२ दुःखांतरेममाऽऽनंदय२ क्षुधार्तिनिवारय
२ नरकभयान्मामुद्धारय२ शिवकवचेनमामाऽऽच्छादय २ ॐसदाशिवायनमोनमस्ते ऋ ५८
षभउवाच इतीदंकवचंशैवंपरमंव्याहृतंमया सर्वबाधाप्रशमनंरहस्यंसर्वदेहिनां यःस
दाधारयेन्मर्त्यःशैवंकवचमुत्तमं नतस्यजायतेक्वापिभयंशंभोरनुग्रहात् क्षीणायुःप्राप्तमृ
त्युर्वामहारोगहतोपिवा देहांतेमुक्तिमाप्नोतिशिववर्मानुभावतः सद्यःसुखमवाप्नोतिदी
र्घमायुश्चविंदति सर्वदारिद्र्यशमनंसर्वमंगल्यवर्धनं योधत्तेकवचंशैवंसदेवैरपिपूज्यते म

श्री हापातकसंघातैःमुच्यतेचोपपातकैः देहांतेमुक्तिमाप्नोतिशिववर्मानुभावतः इतिश्रीऋषभ
५२ प्रोक्तंशिवकवचंसमाप्तमोमितिशिवं ॥ संवत् १९४५ भाद्रवदि ९ गुरुवासरान्वितायां
लिख्यतेपंडितकृष्णेन शुभमस्तुसर्वजगतां ॥

52